**एकादशः पाठः**

# महाभिनिष्क्रमणम्

पुरा भारतवर्षे कपिलवस्तुनाम्नि नगरे शुद्धोदनो नाम राजा अभवत्। तस्य पुत्रः सिद्धार्थः आसीत्। अयं गौतम इति वंशनाम्ना ख्यातः आसीत्। सिद्धार्थः सांसारिकभोगानां नश्वरतां, प्राणिनां कष्टानि च अवलोक्य राज्यभोगात् विरक्तः जातः। अयमेव सिद्धार्थः अनन्तरं गौतमबुद्ध इति नाम्ना प्रसिद्धः अभवत्। पुराणेषु एषः विष्णोः अवतारः अपि कथ्यते।

नाट्यांशोऽयम् सिद्धार्थस्य परिव्रज्याग्रहणपूर्वस्य मानसिक-अवस्थां प्रकटयति।

**सिद्धार्थः** - (स्वगतं चिन्तयन्) हन्त। कियती विडम्बना मानवशरीरस्य। वासन्तिकं यौवनं, कुसुमसुकुमारमनोहरा देहसम्पत्, किमिदं सर्वं स्थिरम् ? किं यशोधरायाः यौवनमचलम् ? किं जरा व्याधिर्मृत्युश्च मदीया अन्तःपुरपरिचारिकाः कदापि नाक्रमिष्यन्ति ? किमेता न जानन्ति यद्यौवनं चपलम् ? जरा रूपं नाशयिष्यति।

**यशोधरा** - कुमार ! कुमार, किं चिन्तयति भवान् ?

**सिद्धार्थः** - न किमपि यशोधरे ! उद्विग्नमिव मे चेतः। इत एहि अत्रोपविश। इदमेव विलोक्य आश्चर्यम् अनुभवामि यशोधरे यत् वयं मनुष्याः प्रतिदिनं ग्रसन्तीं मृत्युराक्षसीं जानन्तोऽपि न शोचामः। अद्य न जाने मदीये हृदये कश्चन् वक्ति यत् जरां व्याधिं मृत्युं च विजित्यैव मनुष्यस्य यौवनं विलासश्च शोभते। नृत्यसङ्गीत-वादित्रेषु नानुरञ्ज्यामि, न च तुष्यामि क्रीडोद्यानद्रुमैः, प्रेक्षागृहपञ्जरैः, स्नानगृहनिर्झरैः।

**यशोधरा** - तर्हि कुमार ! किं व्यवसीयते भवता ?

**सिद्धार्थः** - इदमेव वाञ्छामि यशोधरे, यदधुना परिव्राजको भूत्वा मृत्योर्निग्रहाय तपश्चरेयम्।

**यशोधरा** - किमिदं भाषते भवान् ? परिव्रज्यायाः नायं समयः। कतिपयमासेभ्यः पूर्वमेव तु भवान् शाक्यवंशधरस्य कुमार-राहुलस्य जनकः सञ्जातोऽस्ति। आगच्छतु भवान् अद्य कुमार-राहुलस्य अभिनिष्क्रमणसंस्कारः।

**सिद्धार्थः** - न किमपि इच्छामि यशोधरे। अद्यैव प्रव्रज्यायै अनुमतिं ग्रहीतुं महाराजस्य सौधमुपसर्पामि। अद्यैव प्रव्रज्यायै अनु .........।

**यशोधरा** - (तारस्वरेण) कुत्र प्रयाति कुमारः ? कुमार ! कुमार !

(दृश्यपरिवर्तनम्)

**सिद्धार्थः** - आर्य ! अभिवादये।

**शुद्धोदनः** - सिद्धार्थ ! शाक्यवंशधरो भव।

**सिद्धार्थः** - आर्य ! अद्य एकामनुज्ञां ग्रहीतुं समुपस्थितोऽस्मि। अहं जानामि यदाजन्म महाराजस्य मह्यं किमप्यदेयं नास्ति।

**शुद्धोदनः** - निश्शङ्कं ब्रूहि सिद्धार्थ ! मम प्राणा अपि त्वदधीनाः कुमार !

**सिद्धार्थः -** महाराज ! सुबहु मया विचारितं प्रजानां लोकयात्रार्थम्। अधुना शोकमृत्युभयानां निग्रहाय तपश्चिकीर्षामि। प्रव्रज्यायै अनुज्ञातुमर्हति मां महाराजः।

**(कोलाहलो वर्धते, आश्चर्यम्, आश्चर्यम् इति ध्वनयश्च)**

**शुद्धोदनः -** कुमार सिद्धार्थ ! किमिदं व्यवसितं त्वया ? न हि कालस्ते प्रव्रज्यां ग्रहीतुम्। प्रथमे वयसि चलायां मतौ धर्मचर्या बहु दोषा भवति। मया हि तव कुतूहलार्थं क्रीडोद्याने सर्वापि विनोदसामग्री समुदपस्थापिता। चित्रं मनोज्ञेऽपि विषये तव रतिर्न जायते।

**सिद्धार्थः -** आर्य ! जरा व्याधिश्च मृत्युश्च यदि न स्युस्तर्हि मम मनोज्ञेषु विषयेषु रतिर्भवेत्। असंशयं मृत्युरिति जानतोऽपि यस्य हृदि रागो जायते तस्य चेतना लोहमयीमेव उत्प्रेक्षे।

**शुद्धोदनः -** कुमार ! कस्त्वामिदं बोधितवान् ? तवेदं सुकुमारं वयः प्रसन्नसुन्दरं च वपुः किं प्रव्रज्यायै भगवता सृष्टम् ? नायं कालस्तव तपोवनाश्रयस्य। गच्छ क्रीडोपवनम्। अनुभव नृत्यवादित्रविनोदम्।

**सिद्धार्थः -** कथमहं चेतनां वञ्चयेयमार्य। यदि भवान्मे प्रतिभूर्भवति यन्मम जीवनं मरणाय न सृष्टमस्ति, मम शरीरं रोगेभ्यः सर्वदा मुक्तं स्यात्, मम यौवनं च जरा न कदाप्याक्षिपेत्, तर्हि अहं तपोवनं न श्रयिष्ये।

**सूत्रधारः -** संसारस्य निःसारता, जनन-मरण-चक्रस्य बन्धनं, मानुषी गतिः, सर्वमिदं विचिन्त्य सिद्धार्थो व्यरज्यत लोकयात्रातः। सकृन्निशीथे तेन व्यवसितं यत्सर्वमिदं प्रपञ्चं परित्यज्य जननमरणयोः पारं द्रष्टुं स तपस्तप्स्यति, साधनां विधास्यति, जीवनरहस्यं बोद्धुं प्रयतिष्यते। (इति निष्क्रान्तः सर्वे)

## शब्दार्थः

स्वगतम् - मन ही मन। जरा - बुढ़ापा। ग्रसन्तीम् - खाती हुई को। शोचामः - हम सोचते हैं। मृत्युराक्षसीम् - मृत्यु रूपी राक्षसी को। मदीये - मेरे। व्याधिम् - बीमारी को। विजित्यैव - जीतकर ही। नानुरज्ज्यामि - प्रसन्न नहीं होता हूँ। प्रेक्षागृहपञ्जरैः - नाट्य शाला/रङ्ग शाला के पात्रों से। स्नानगृहनिर्झरैः - स्नानगृह के झरनों से। वाञ्छामि - चाहता हूँ। परिव्राजकः - संन्यासी। मृत्योर्निग्रहाय - मृत्यु को पराजित करने के लिए। सौधमुपसर्पामि - महल में जाऊँगा। तारस्वरेण - ऊँचे स्वर में। प्रयाति - जाता है। सुबहु - बहुत बार, अच्छी तरह से। तपश्चिकीर्षामि - तप करने की इच्छा करता हूँ। श्रयिष्ये - आश्रय ग्रहण करूँगा। बोद्धुम् - जानने के लिए।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) का रूपं नाशयिष्यति ?

(ख) सिद्धार्थः कस्य पुत्रः आसीत् ?

(ग) यशोधरा कस्य पत्नी आसीत् ?

(घ) सिद्धार्थस्य पुत्रः कः आसीत् ?

(ङ) सिद्धार्थः कस्मिन् वंशे उत्पन्नः अभूत् ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) कस्य अभिनिष्क्रमणसंस्कारः अस्ति ?

(ख) सिद्धार्थः अनुज्ञां प्राप्तुं कस्य समीपं गतः ?

(ग) सिद्धार्थः केषु नानुरज्यति ?

(घ) वयं मनुष्याः कां जानन्तोऽपि न शोचामः ?

(ङ) मनुष्यस्य यौवनं विलासश्च कदा शोभते ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) यशोधरा तारस्वरेण सिद्धार्थं किम् उक्तवती ?

(ख) सिद्धार्थः किमर्थं लोकयात्रातः व्यरज्यत ?

(ग) मनोज्ञेषु विषयेषु रतिविषये सिद्धार्थः शुद्धोदनं किम् अकथयत् ?

4. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्ध वाक्यानां समक्षं ''न'' इति लिखत –**

(क) शुद्धोदनः राहुलस्य पिता आसीत्। ☐

(ख) यशोधरा राहुलस्य माता आसीत्। ☐

(ग) सिद्धार्थः प्रव्रज्यार्थम् इच्छति। ☐

(घ) सिद्धार्थः यशोधरायाः अनुज्ञां प्राप्तुं गतः। ☐

(ङ) शुद्धोदनः शाक्यवंशीयः न आसीत्। ☐

5. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा-हृदये | हृदय | सप्तमीविभक्तिः | एकवचनम् |
| (क) मया | | | |
| (ख) प्रव्रज्यायै | | | |
| (ग) मनुष्यस्य | | | |
| (घ) वयसि | | | |
| (ङ) मतौ | | | |

6. **अधोलिखितपदानां धातुं लकारं च लिखत –**

| पदम् | धातुः | लकारः |
|---|---|---|
| यथा -भाषते | भाष् | लट्लकारः (आत्मनेपदी) |
| (क) जायते | | |
| (ख) प्रयतिष्यते | | |
| (ग) वर्धते | | |
| (घ) शोभते | | |

7. **अधोलिखितपदानां धातुं प्रत्ययञ्च पृथक्कुरुत –**

| पदम् | धातुः | प्रत्ययः |
|---|---|---|
| यथा -विजित्य | वि + जि + | ल्यप्। |

(क) ग्रहीतुम्

(ख) विचिन्त्य

(ग) बोद्धुम्

(घ) द्रष्टुम्

(ङ) परित्यज्य

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| पदम् | | सन्धिविच्छेदः | | सन्धिनाम |
|---|---|---|---|---|
| यथा -अद्यैव | = | अद्य + एव | = | वृद्धिसन्धिः। |

(क) समुपस्थितोऽस्मि

(ख) किमप्यदेयम्

(ग) तपश्चरेयम्

(घ) सकृन्निशीथे

(ङ) क्रीडोपवनम्

9. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत –**

(क) धर्मचर्या

(ख) क्रीडोद्यानम्

(ग) विनोदसामग्री

(घ) लोकयात्रा

(ङ) महाराजः

10. **रेखाङ्कितसंज्ञाशब्दानां स्थाने सर्वनामशब्दानां प्रयोगं कुरुत –**

(क) **राहुलः** शाक्यवंशधरः आसीत्।

(ख) **यशोधरा** सिद्धार्थस्य पत्नी आसीत्।

(ग) **सिद्धार्थस्य** पिता शुद्धोदनः आसीत्।

(घ) **सिद्धार्थः** परिव्राजकः अभवत्।

(ङ) सिद्धार्थः **राहुलस्य** जनकः आसीत्।

## योग्यताविस्तारः –

- सिद्धार्थस्य विस्तृतजीवनचरितम् अन्विष्य लिखत।
- अस्य नाट्यांशस्य सामूहिकम् अभिनयं कुरुत।

**द्वादशः पाठः**

# वर्षावर्णनम्



संस्कृतसाहित्ये प्रसिद्धानि काव्यानि महाकाव्यानि च सन्ति। काव्येषु आदिकाव्यं रामायणं विश्वप्रसिद्धं वर्तते। रामायणस्य रचयिता वाल्मीकि: आदिकवि: विद्यते। अस्मिन् काव्ये सप्तकाण्डेषु भगवतो रामचन्द्रस्याखिलं चरित्रं वर्णितमस्ति। पाठोऽयं किष्किन्धाकाण्डात् अष्टाविंशसर्गात् उद्धृत:। पाठेऽस्मिन् सन्दर्भोचितं प्रकृतिवर्णनं ऋतुवर्णनं तत्रापि वर्षर्तो: मनोरमं वर्णनमस्ति।

*रज: प्रशान्तं सहिमोऽद्य वायु-*
*र्निदाघदोषप्रसरा: प्रशान्ता:।*
*स्थिता हि यात्रा वसुधाधिपानां*
*प्रवासिनो यान्ति नरा: स्वदेशान् ॥1॥*

**अन्वय:** - अद्य (पृथिव्या:) रज: प्रशान्तम् वायु: सहिम:, प्रसरा: निदाघदोषा: प्रशान्ता:, वसुधाधिपानां यात्रा स्थिता हि। प्रवासिन: नरा: स्वदेशान् यान्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| रज: | - | धूलि कण |
| सहिम: | - | बर्फ/शीतलता से युक्त |
| प्रसरा: | - | फैले हुए |
| निदाघदोषा: | - | गर्मी के दोष |
| प्रशान्ता: | - | शान्त हो गए हैं |
| वसुधाधिपानाम् | - | राजाओं की |
| प्रवासिन: | - | विदेश में निवास करने वाले |

*समुद्वहन्त: सलिलातिभारं*
*बलाकिनो वारिधरा नदन्त:।*
*महत्सु शृङ्गेषु महीधराणां*
*विश्रम्य-विश्रम्य पुन: प्रयान्ति ॥2॥*

**अन्वय:** - बलाकिन: (सुशोभिता:) वारिधरा: सलिलातिभारं समुद्वहन्त: नदन्त: महीधराणां महत्सु शृङ्गेषु विश्रम्य-विश्रम्य पुन: (अग्रे) प्रयान्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| बलाकिन: | - | बक पङ्क्तियों से |
| वारिधरा: | - | बादल |
| सलिलातिभारम् | - | पानी के अधिक भार को |
| नदन्त: | - | गर्जना करते हुए |
| महीधराणाम् | - | पर्वतों के |

| | | |
|---|---|---|
| शृङ्गेषु | - | शिखरों/चोटियों पर |
| विश्रम्य | - | विश्राम करके |
| प्रयान्ति | - | जाते हैं |

*वहन्ति वर्षन्ति नदन्ति भान्ति*
*ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।*
*नद्यो घना मत्तगजा: वनान्ता:*
*प्रियाविहीना: शिखिन: प्लवङ्गमा: ।।3।।*

**अन्वय:** - नद्य: वहन्ति, घना: वर्षन्ति, मत्तगजा: नदन्ति, वनान्ता: भान्ति, प्रियाविहीना: (प्राणिन:) ध्यायन्ति, शिखिन: नृत्यन्ति, प्लवङ्गमा: समाश्वसन्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| वहन्ति | - | बहती हैं |
| मत्तगजा: | - | मतवाले हाथी |
| नदन्ति | - | चिग्घाड़ रहे हैं |
| वनान्ता: | - | वन प्रान्त |
| भान्ति | - | सुशोभित हो रहे हैं |
| ध्यायन्ति | - | चिन्तामग्न हो रहे हैं |
| शिखिन: | - | मोर |
| प्लवङ्गमा: | - | मेंढक |
| समाश्वसन्ति | - | निश्चिन्त/सुखी हो रहे हैं |

*वर्षप्रवेगाविपुला: पतन्ति*
*प्रवान्ति वाता: समुदीर्णवेगा: ।*
*प्रणष्टकूला: प्रवहन्ति शीघ्रं*
*नद्यो जलं विप्रतिपन्नमार्गा: ।।4।।*

**अन्वय:** - विपुला: वर्षप्रवेगा: पतन्ति। वाता: समुदीर्णवेगा: प्रवान्ति। प्रणष्टकूला: विप्रतिपन्नमार्गा: नद्य: जलं शीघ्रं प्रवहन्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| विपुला: | - | बहुत अधिक |
| वर्षप्रवेगा: | - | वर्षा का वेग |
| प्रवान्ति | - | बह रही हैं |
| प्रणष्टकूला: | - | जिनके किनारे नष्ट हो गए हैं, जल के वेग से जिन्होंने कगारों को काट दिया है |
| विप्रतिपन्नमार्गा: | - | मार्ग को रोक दिया है, मार्ग अवरुद्ध कर दिया है जिन्होंने |

*षट्पादतन्त्रीमधुराभिधानं*
*प्लवङ्गमोदीरितकण्ठतालम् ।*
*आविष्कृतं मेघमृदङ्गनादै-*
*र्वनेषु सङ्गीतमिव प्रवृत्तम् ।।5।।*

**अन्वय:** - वनेषु षट्पादतन्त्रीमधुराभिधानं, प्लवङ्गमोदीरितकण्ठतालम् मेघमृदङ्गनादै: आविष्कृतं सङ्गीतमिव प्रवृत्तम्।

**शब्दार्थ:** -

| | | |
|---|---|---|
| षट्पदा: | - | भौंरे |
| तन्त्री | - | वीणा |
| प्लवङ्गमा: | - | मेंढक |
| प्रवृत्तम् | - | लगे हैं/कर रहे हैं |

*मत्ता गजेन्द्रा मुदिता गवेन्द्रा*
*वनेषु विक्रान्ततरा मृगेन्द्राः।*
*रम्या नगेन्द्रा निभृता नरेन्द्राः*
*प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥6॥*

**अन्वय:** - गजेन्द्रा: मत्ता:, गवेन्द्रा: मुदिता:, मृगेन्द्रा: वनेषु विक्रान्ततरा: नगेन्द्रा: रम्या: (दृश्यन्ते) नरेन्द्रा: निभृता: सुरेन्द्र: वारिधरै: प्रक्रीडित:।

**शब्दार्थ:** -

| | | |
|---|---|---|
| गवेन्द्रा: | - | बैल/पशुगण |
| मुदिता: | - | प्रसन्न |
| मृगेन्द्रा: | - | सिंह |
| विक्रान्ततरा: | - | अत्यन्तपराक्रमशाली |
| नगेन्द्रा: | - | बड़े-बड़े पर्वत |
| नरेन्द्रा: | - | राजा गण |
| निभृता: | - | मौन (युद्धादि उत्साह को छोड़कर) |
| सुरेन्द्र: | - | देवताओं का राजा इन्द्र |
| वारिधरै: | - | मेघों से |

*घनोपगूढं गगनं न तारा*
*न भास्करो दर्शनमभ्युपैति।*
*नवैर्जलौघैर्धरणी वितृप्ता*
*तमोविलिप्ता न दिशः प्रकाशाः ॥7॥*

**अन्वय:** - गगनं घनोपगूढं तारा: भास्कर: (च) दर्शनं न अभ्युपैति। धरणी नवै: जलौघै: वितृप्ता। दिश: तमोविलिप्ता: न प्रकाशा:।

**शब्दार्थ:** -

| | | |
|---|---|---|
| घनोपगूढम् | - | घने अन्धकार से आच्छादित |
| धरणी | - | धरती |
| जलौघै: | - | जल के बहने से |
| वितृप्ता | - | पूर्ण रूप से तृप्त हो गई है |
| तमोविलिप्ता: | - | अन्धकार से लिप्त |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत –**

(क) समुदीर्णवेगाः के प्रवान्ति ?

(ख) वर्षाकाले शिखिनः किं कुर्वन्ति ?

(ग) वर्षाकाले के भान्ति ?

(घ) कः मृदङ्गनादम् करोति ?

(ङ) घनोपगूढं किम् ?

**2. एकवाक्येन उत्तरं लिखत –**

(क) वारिधराः कुत्र विश्रम्य पुनः प्रयान्ति ?

(ख) वर्षाकाले मृगेन्द्राः कीदृशाः भवन्ति ?

(ग) वर्षाकाले धरणी कैः वितृप्ता भवति ?

(घ) वर्षाकाले के प्रशान्ताः भवन्ति ?

(ङ) सुरेन्द्रः कैः प्रक्रीडितः ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) वर्षाकाले वारिधराः कथं प्रयान्ति ?

(ख) वर्षाकाले नद्यः कथं वहन्ति ?

(ग) वनेषु सङ्गीतं कैः कथम् आविष्कृतम् ?

**4. प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(मृगेन्द्राः, वनेषु, नराः, धरणी, वारिधरैः)

(क) प्रवासिनो यान्ति ....................... स्वदेशान्।

(ख) वनेषु विक्रान्ततराः .......................।

(ग) नवैर्जलौघैः .................... वितृप्ता।

(घ) प्रक्रीडितो .................... सुरेन्द्रः।

(ङ) .............................. सङ्गीतमिव प्रवृत्तम्।

**5. यथायोग्यं योजयत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | नद्यः | वर्षन्ति |
| (ख) | घनाः | वहन्ति |
| (ग) | मत्तगजाः | नृत्यन्ति |
| (घ) | वनान्ताः | नदन्ति |
| (ङ) | शिखिनः | भान्ति |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) प्रवासिन: नरा: स्वदेशान् यान्ति। ☐

(ख) विपुला: वर्षप्रवेगा: पतन्ति। ☐

(ग) प्लवङ्गमा: मृदङ्गनादं कुर्वन्ति। ☐

(घ) नरेन्द्रा: निभृता:। ☐

(ङ) धरणी अतृप्ता। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा - नरा: | नर | प्रथमा | बहुवचनम् |
| (क) शिखिन: | | | |
| (ख) प्लवङ्गमा: | | | |
| (ग) नद्य: | | | |
| (घ) जलम् | | | |

8. **निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा- पतन्ति | पत् | लट् | प्रथमपुरुष: | बहुवचनम् |
| (क) यान्ति | | | | |
| (ख) प्रवहन्ति | | | | |
| (ग) प्रवान्ति | | | | |
| (घ) ध्यायन्ति | | | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | | सन्धिविच्छेद: | सन्धिनाम |
|---|---|---|---|
| यथा -मृगेन्द्रा: | = | मृग + इन्द्रा: | गुणसन्धि: |
| (क) नद्यो जलम् | | | |
| (ख) घनोपगूढम् | | | |
| (ग) जलौघै: | | | |
| (घ) सहिमोऽद्य | | | |

**10. अधोलिखितान् उपसर्गान् योजयित्वा शब्दनिर्माणं कुरुत –**

| उपसर्गः | + | मूलशब्दः | = | उपसर्गयुक्तशब्दः |
|---|---|---|---|---|
| यथा -प्र | + | शान्तम् | = | प्रशान्तम् |

(क) प्रति

(ख) वि

(ग) अधि

(घ) सम्

(ङ) उत्

**11. अधोलिखितानां शब्दानां पर्यायशब्दान् लिखत –**

यथा -वायुः = पवनः

(क) नराः

(ख) वारिधराः

(ग) शिखिनः

(घ) प्लवङ्गमाः

(ङ) महीधराणाम्

## योग्यताविस्तारः –

- पाठे समागतानां श्लोकानां लयबद्धगानं कुरुत।
- महर्षिवाल्मीकेः जीवनवृत्तान्तं पठत।
- रामायणग्रन्थतः प्रकृतिचित्रणविषयकान् (पाठेतरान्) दशश्लोकान् लिखत।
- रामायणग्रन्थस्य सप्तकाण्डानां नामानि लिखत।
- ''वर्षर्तुः'' इतिविषयमवलम्व्य संस्कृते निबन्धरचनां कुरुत।

त्रयोदशः पाठः

# महाभारते विज्ञानम्

**संस्कृतसाहित्यपरम्परायां वेदानामनन्तरं लक्षैकपद्यात्मकस्य महाभारतस्य महत्त्वपूर्णं स्थानं विद्यते। संस्कृतविद्वत्समाजे "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचिदिति" कथनमति प्रसिद्धम्। सत्यमपीदं यत् यन्महाभारते विद्यते तदेव अन्यत्र, यच्च महाभारते नास्ति तदन्यत्रापि नास्ति। 'महाभारतम्' आकरग्रन्थः इति सत्यम्। श्रीमता कृष्णद्वैपायनव्यासेन विरचिते महाभारते जीवनस्य सर्वेषामेव विषयाणां तात्त्विकं चिन्तनं लभ्यते। यथोक्तं यत् महाभारते सर्वेऽपि विषयाः प्रतिपादिताः वर्तन्ते तदनु अत्र पाठे ततः केषाञ्चित् वैज्ञानिकविषयाणां संक्षेपेण वर्णनं प्रस्तूयते ।**

भारतीयसनातनवैदिकसंस्कृतेः परिचायकः, आकरग्रन्थः 'श्रीमन्महाभारतम्'। यस्य प्रणयनं भगवता वेदव्यासेन लोकोपकाराय कृतम् अस्ति। एतस्य महत्ताविषये स्वयमेव कृष्णद्वैपायनो मुनिः प्रकाशयति -

*"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।*
*यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥"*

'महाभारतम्' न केवलं विश्वकोशत्वेन विद्यते अपित्वत्र पुराणेतिहासादीनां वैज्ञानिकदृष्ट्या भौतिकशास्त्र-खगोलशास्त्र-कृषि-जलबन्ध-जलसेचनादिव्यवस्था-रसायनशास्त्र-वैद्यकशास्त्र-लौहशास्त्र-वस्त्रनिर्माण-शस्त्रास्त्रनिर्माणसञ्चालन-विधिरित्यादयः बहवः विषयाः ज्ञान-विज्ञानोपेताः वर्णिताः सन्ति। तेषु केचन विषयाः अत्र उदाह्रियन्ते -

**भौतिकशास्त्रम् –** 'वस्तूनाम् अन्यसापेक्षं चलनम्' इत्येषः विचारः भौतिकशास्त्रे अतीव प्रसिद्धः। महतः आश्चर्यस्य विषयोऽयम् अस्ति यत् इमं मतं भगवान् बादरायणः संस्थापयति महाभारते -

*"चलं यथा दृष्टिपथं परैति सूक्ष्मं महद्रूपमिवाभिभाति।*
*स्वरूपमालोचयते च रूपं परं तथा बुद्धिपथं परैति॥23॥"*

अस्य पद्यस्य प्रथमे पादे तेन स एव विचारः प्रकटितः अस्ति। अत्रैव अन्यौ अपि द्वौ भौतिकशास्त्रसम्बद्धौ विचारौ कथितौ स्तः। तौ च- 'काचकेन दर्शनेन सूक्ष्मम् अपि वस्तु बृहद् इव भासते' इति 'स्वच्छे दर्पणे वस्तुनः रूपस्य तादृशमेव प्रतिबिम्बं दृश्यते' इति च।

**खगोलशास्त्रम् –** कालगणनाक्षेत्रे भारतीयं खगोलशास्त्रं विश्वस्मिन् प्रसिद्धम् अस्ति। खगोलस्य भावार्थः भवति यद् आकाशः अपि पृथिवीव गोलः अस्ति। महाभारते तु विपलं 'सेकेण्ड्' इति आङ्ग्लीयनाम्ना प्रसिद्धम्, इत्यस्यापि विभागः कृतः दृश्यते। यथा -

*"काष्ठा निमेषा दश पञ्च चैव त्रिंशत्तु काष्ठा गणयेत् कलां ताम्।*
*त्रिंशत्कलाश्चापि भवेन्मुहूर्तो भागः कलायाः दशमश्च यः स्यात्॥12॥"*

एवमेव सूर्यचन्द्रग्रहणविषयिण्याः खगोलीयघटनायाः वर्णनम् अपि महाभारतकारः करोति।

**कृषि-जलबन्ध-जलसेचनादिव्यवस्था** – 'जलमेव जीवनम्' इत्युक्त्या सिद्धयति यत् जलं विना जीवनं कथमपि न सम्भवम् । जलं न भविष्यति चेत्तदा धान्योत्पत्तिः कथं भविष्यति ? अतः जलबन्धपूर्वकं विशालजलराशिं सङ्कलय्य तस्य सम्यक्रूपेण सेचनादि व्यवस्था करणीया । एतदर्थं सत्यवतीसुतः महाभारते उल्लिखति -

*'क्षेत्रं हि रसवत् शुद्धं कर्षकेणोपपादितम् ।*
*ऋते वर्षं न कौन्तेय !, जातु निर्वर्तयेत् फलम् ॥2॥'*

तत्र वै पौरुषं ब्रूयुः आसेकं यत्नकारितम् । सस्यानां जलसेचनाय नदीषु जलबन्धाः स्थापयितुम् अपि निर्दिशति ।

**रसायनशास्त्रम्** – महाभारतकाले रसायनशास्त्रस्य पर्याप्तः विकासः अभवत् । तस्माद् एव औषधिविज्ञानं, धातुशास्त्रं च विकसितम् । व्यासदेवः कथयति -

*'रसायनविदश्चैव सुप्रयुक्तरसायनाः ।*
*दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः ॥'*

नानाविधानां सुगन्धद्रव्याणां निर्माणार्थं पुष्पाणां तैलस्य च उपयोगः तदानीन्तनाः जनाः कुर्वन्ति स्म । तिल-सर्षपतैलस्य बहुशः उल्लेखो वर्तते ।

**वैद्यकशास्त्रम्** – मनुष्यः सदा नीरोगः भवेत् । अत एव स्वस्थशरीरार्थं बहवः उपायाः वर्णिताः सन्ति । वैद्यकशास्त्रम् आरोग्यशास्त्रम् अपि कथ्यते । स्वास्थ्यघातकाः ये राजरोगादयः सन्ति । तेषां सर्वथा शमनाय द्विसप्ततिविधाः चिकित्साः करणीयाः । उल्लेखः एवंविधः विद्यते -

*'द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया ।*
*देशजातिकुलानां च धर्माः समनुवर्णिताः ॥71॥ शान्तिपर्वणि 59'*

**लौहशास्त्रम्** – वयं जानीमः यत् सुवर्णं, रजतं, ताम्रं, सीसं, त्रपुः, अयः इति नाम्ना धातवः प्रसिद्धाः सन्ति । आभरणस्वरूपेण, क्रयविक्रयव्यवहारसाधनत्वेन च सुवर्णरजतयोः उपयोगिता महाभारते वर्णिता अस्ति । राजप्रासादादीनां निर्माणे अयसः उपयोगः भवति स्म । सुवर्णस्य अग्नौ तापनेन शुद्धीकरणक्रमः तदानीन्तनस्य व्यवहारस्य प्रमाणम् उपस्थापयति -

*'यथा हि कनकं शुद्धं तापच्छेदनिघर्षणैः ।*
*परीक्ष्येत तथा शिष्यान् ईक्षेत्शीलगुणादिभिः ॥46॥ शान्तिपर्वणि 329*

**वस्त्रनिर्माणम्** – मानवस्य स्वभावोऽयम् अस्ति, यत् सः लज्जया स्वकीयं नश्वरम् अपि शरीरं वस्त्रेण आच्छादितुम् इच्छति । वैदिककालाद् एव वस्त्रनिर्माण-परम्परा वर्तते । महाभारते ऊर्ण-कार्पास-कौशेयादिवस्त्राणां निर्माणस्य, तत्र तु स्वापेक्षितस्य वर्णस्य संयोजनस्य च वर्णनं मिलति । यथा -

*''यादृशेन हि वर्णेन भाव्यते शुक्लमम्बरम् ।*
*तादृशं कुरुते रूपम् एतदेवमवेहि मे ॥5॥ शान्तिपर्वणि 293''*

अनेन ज्ञायते यद् इदं लक्षैकपद्यात्मकं महाकाव्यं महाभारतं एकतः पुरुषार्थचतुष्टय-प्रकाशकं वर्तते, ततो अपि अधिकं ज्ञानविज्ञानयोः वैशद्यं च समुपदिशति ।

## अन्वय:

***धर्मे चार्थे च ............ तत् क्वचित् ॥***

**अन्वय:** - हे भरतर्षभ ! धर्मे च, अर्थे च, कामे च, मोक्षे च यद् इह अस्ति, तद् अन्यत्र (अस्ति), यद् इह न अस्ति, तत् क्वचित् न (अस्ति)।

***चलं यथा दृष्टि ......................... बुद्धिपथं परैति ॥***

**अन्वय:** - यथा चलं दृष्टिपथं परैति, सूक्ष्मं महद् रूपम् इव अभिभाति, रूपं स्वरूपं च आलोचयते, तथा परं बुद्धिपथं परैति।

***काष्ठा निमेषा .................. य: स्यात् ॥***

**अन्वय:** - दश काष्ठा:, निमेषा: पञ्च च एव, त्रिंशत् तु काष्ठा तां कलां गणयेत् मुहूर्त्तो भाग: त्रिंशत् कला: च अपि भवेत् य: कलाया: दशम: च स्यात्।

***क्षेत्रं हि रसवत् ................ निर्वर्तयेत् फलम् ॥***

**अन्वय:** - हि कर्षकेण उपपादितं क्षेत्रं रसवत् शुद्धम् कौन्तेय ! वर्षम् ऋते न जातु फलं निर्वर्तयेत्।

***रसायनविदश्चैव ................... इवोत्तमै: ।***

**अन्वय:** - रसायनविद:, सुप्रयुक्तरसायना: च एव जरया भग्ना दृश्यन्ते, उत्तमै: नागै: नगा इव।

***द्वासप्ततिविधा ............... समनुवर्णिता: ॥***

**अन्वय:** - शरीरस्य प्रतिक्रिया द्वासप्ततिविधा च एव। देश, जाति, कुलानां च धर्मा: समनुवर्णिता: (सन्ति)।

***यथा हि कनकं .................... शीलगुणादिभि: ॥***

**अन्वय:** - यथा हि शुद्धं कनकं तापच्छेदनिघर्षणै: परीक्ष्यते तथा शिष्यान् शीलगुणादिभि: ईक्षेत्॥

***यादृशेन हि .......................एतदेवमवेहि मे ॥***

**अन्वय:** - हि यादृशेन वर्णेन शुक्लम् अम्बरं भाव्यते तादृशं रूपं कुरुते; एतद् एवम् एव मे (मतम्) अवेहि।

## शब्दार्थ:

परिचायक: - परिचय करने वाला। आकर: - खान (खदान)। प्रकाशयति - प्रकाशित करता है। क्वचित् - कहीं। जलबन्ध - पानी के बाँध। उपेता: - सहित। उदाह्रियन्ते - उदाहरण दिये जाते हैं। संस्थापयति - स्थापित करता है। अभिभाति - दिखाई देता है। आलोचयते - दिखलाता है। परैति - आती है। प्रतिबिम्बम् - परछाई। आङ्ग्लीयनाम्ना - अंग्रेजी नाम से। काष्ठा - अट्ठारह निमेष की सङ्ख्या। निमेषा: - नेत्रों की पलक गिरने का समय। जलसेचनम् - पानी से सिंचाई। सङ्कलय्य - एकत्रित करके। उल्लिखति - उल्लेख करता है। क्षेत्रम् - खेत। कर्षकेण - किसान के द्वारा। ऋते - बिना। सस्यानाम् - फसलों की। स्थापयितुम् - स्थापित करने के लिये। निर्दिशति - निर्देश देता है। रसायनविद: - रसायनशास्त्र के जानकार। सुप्रयुक्त - ठीक प्रकार से प्रयोग किये गये। दृश्यन्ते - दिखायी देते हैं। नानाविधानाम् - अनेक प्रकार के। तदानीन्तना: - उस समय के। नीरोग: - स्वस्थ। बहव: - बहुत से।

स्वास्थ्यघातका: - स्वास्थ्य को नष्ट करने वाले। शमनाय - शान्ति,रोक के लिये। द्विसप्ततिविधा: - बहत्तर ७२ प्रकार की। एवंविध: - इस प्रकार। त्रपु: - राँगा। राजप्रासादादीनाम् - राजमहल आदि के। अयस: - लोहे का। तापनेन - तपाने से। उपस्थापयति - उपस्थित करता है। तापच्छेदनिघर्षणै: - तपाकर, काटकर और घिसकर। परीक्ष्येत - परीक्षा करनी चाहिए। आच्छादितुम् - ढँकने के लिये। ऊर्णम् - ऊन। कार्पासम् - कपास/रुई। कौशेयम् - रेशमी। संयोजनस्य- मिलाने का। अम्बरम् - वस्त्र। कुरुते - करता है। ज्ञायते - जाना जाता है। वैशद्यम् - विस्तार पूर्वक। समुपदिशति - ठीक प्रकार से उपदेश करता है।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) महाभारतस्य प्रणयनं केन कृतम् ?

(ख) जलं विना किं न सम्भवम् ?

(ग) खगोलशास्त्रं कस्मिन् क्षेत्रे प्रसिद्धम् ?

(घ) राजप्रासादादीनां निर्माणे कस्य उपयोग: भवति स्म ?

(ङ) केन दर्शनेन सूक्ष्मवस्तु बृहद् इव भासते ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) शिष्यान् कथं परीक्ष्येत् ?

(ख) आभरणस्वरूपेण कयो: उपयोगिता महाभारते वर्णिता ?

(ग) जना: सुगन्धद्रव्याणां निर्माणार्थं कस्य उपयोग: कुर्वन्ति स्म ?

(घ) वेदव्यासेन महाभारतस्य प्रणयनं किमर्थं कृतम् ?

(ङ) महाभारतं कस्या: परिचायकग्रन्थ: ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) मानवस्य स्वभाव: क: ?

(ख) रसायनशास्त्रविषये व्यासदेव: किं कथयति ?

(ग) भौतिकशास्त्रे अतीव प्रसिद्ध: क: विचार: ?

4. **यथायोग्यं योजयत -**

| 'अ' | 'आ' |
|---|---|
| (क) क्षेत्रम् | आरोग्यशास्त्रम् |
| (ख) विपलम् | कृषि: |
| (ग) वैद्यकशास्त्रम् | सेकेण्ड |
| (घ) वेदव्यास: | खगोलशास्त्रम् |
| (ङ) कालगणना | महाभारतम् |

**5. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) महाभारते सर्षपतैलस्य बहुश: उल्लेखो वर्तते। ☐

(ख) राजरोगाणां शमनाय पञ्चसप्ततिविधाः चिकित्साः करणीयाः। ☐

(ग) महाभारतं लक्षैकपद्यात्मकं महाकाव्यम् अस्ति। ☐

(घ) यत् महाभारते अस्ति तदन्यत्र नास्ति। ☐

(ङ) वस्तूनाम् अन्यसापेक्षं चलनम् भौतिकशास्त्रस्य सिद्धान्त:। ☐

**6. अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा -लज्जया | लज्जा | तृतीया | एकवचनम् |
| (क) अयस: | | | |
| (ख) कुलानाम् | | | |
| (ग) वस्त्रेण | | | |
| (घ) पुष्पाणाम् | | | |
| (ङ) तैलस्य | | | |
| (च) शमनाय | | | |

**7. अधोलिखितपदानां धातुं लकारं वचनं च लिखत -**

| पदम् | धातु: | लकार: | वचनम् |
|---|---|---|---|
| यथा - कथयति | कथ् | लट्लकार: | एकवचनम् |
| (क) विद्यते | | | |
| (ख) वर्तते | | | |
| (ग) उल्लिखति | | | |
| (घ) परीक्ष्येत | | | |

**8. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | सन्धिविच्छेद: | सन्धिनाम् |
|---|---|---|
| यथा -अत्रैव | अत्र + एव | वृद्धिसन्धि: |
| (क) विषयोऽयम् | | |
| (ख) इत्येष: | | |
| (ग) त्वत्र | | |
| (घ) एतदर्थम् | | |
| (ङ) सदोत्थाय | | |

9. **अधोलिखितशब्दानां पर्यायवाचिशब्दान् लिखत -**

यथा -जलम् वारि

(क) वेदव्यास:

(ख) काल:

(ग) सुवर्णम्

(घ) मनुष्य:

10. **अधोलिखिताव्ययानां वाक्यप्रयोगं कुरुत -**

**यथा - अत्र** **अहम् <u>अत्र</u> अस्मि ।**

(क) अपि

(ख) इदानीम्

(ग) विना

(घ) यथा

(ङ) एव

**योग्यताविस्तार: -**

- कृष्णद्वैपायनवेदव्यासविषये निबन्धो लिखत।
- महाभारते कति पर्वाणि सन्ति? तेषां नामानि लिखत।

**चतुर्दशः पाठः**

# समयस्य सदुपयोगः

बहुभाग्योदयेन एव मानवजीवनं प्राप्यते। एतज्जीवनं देवानां कृते अपि दुर्लभं वर्तते। जीवनस्य उन्नत्यै आलस्यं विहाय अहर्निशम् उत्तमानि कार्याणि करणीयानि यतोहि विगतः समयः पुनर्नागच्छति। पाठेऽस्मिन् संवादमाध्यमेन समयस्य महत्त्वं प्रतिपादितम्।

**आचार्यः** - छात्राः ! मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

**छात्राः** - परिश्रमः, अध्ययनं, परोपकारः, समयः इत्यादयः।

**आचार्यः** - आम् मानवजीवनस्य उन्नत्यै विभिन्नानि महत्त्वपूर्णाङ्गानि सन्ति किन्तु तेषु समयस्य सदुपयोगः अर्थात् सत्सु कार्येषु उपयोगः महत्त्वपूर्णः वर्तते।

**छात्राः** - कथम् एतत् ?

**आचार्यः** - समयो हि अन्येषां वस्तूनाम् अपेक्षया अधिकः महत्त्वपूर्णः अधिकश्च मूल्यवान् वर्तते। अन्यानि वस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते; परं समयो विनष्टो न केनापि उपायेन पुनः परावर्तयितुं शक्यते यस्य आयुषो यावान् अंशः निरर्थकः गतः सः गतः एव।

**छात्राः** - जनाः समयस्य दुरुपयोगं कथं-कथं कुर्वन्ति ?

**आचार्यः** - जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति-व्यर्थयापनेन अकार्यकरणेन च। अनेके जनाः कार्यसम्पादने समर्था अपि निरर्थकं समयं यापयन्ति। इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनं गृहे-गृहे अटन्ति। न ते स्वार्थाय एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव। देवदुर्लभमिदं मानवशरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमिः एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति।

**छात्राः** - आचार्य ! ये जनाः जीवने समयस्य सदुपयोगं न कुर्वन्ति ते कां क्षतिम् अनुभवन्ति ?

**आचार्यः** - ईदृशाः जनाः केभ्यः अपि न रोचन्ते न वा कश्चित् आश्रयमेव दातुमिच्छति। स यत्रैव गच्छति ततः एव बहिष्क्रियते सर्वत्र च तिरस्कृतो भवति। किमधिकं पितरौ अपि एतादृशं तनयं नाभिनन्दतः का पुनरन्येषां बन्धुबान्धवानां वार्ता।

**छात्राः** - आचार्य ! ये जनाः जीवने समयस्य सदुपयोगं कुर्वन्ति तेषां जीवनं कथं भवति ?

**आचार्यः** - ये जनाः कदापि समयस्य दुरुपयोगं न कुर्वन्ति सदैव कार्यसंलग्नाः तिष्ठन्ति न च परिश्रमात् आत्मानं गोपयन्ति तेषां सुखेन निर्वाहो भवति। ते यत्रैव गच्छन्ति तत्रैव सादरं रक्ष्यन्ते गृहे बहिश्च सर्वत्रैव समानरूपेण अभिनन्द्यन्ते। सर्वे एव तेषां सहयोगमिच्छन्ति। तादृशाः एव च कर्मवीराः जनाः समाजे सर्वत्र समाद्रियन्ते श्रेष्ठपदं च लभन्ते।

**छात्राः** - आचार्य ! समयस्य सदुपयोगैः जनाः काम् उन्नतिं प्राप्नुवन्ति ?

**आचार्यः** - शृण्वन्तु-अद्यावधि ये- महापुरुषाः जगति प्रसिद्धाः अभवन् तेषां जीवनचरित्रस्य अध्ययनेन ज्ञायते यत् ते बाल्यकालादेव अहोरात्रं कर्मपरायणा आसन् एकमपि क्षणं निरर्थकं नहि नीतवन्तः। ''कार्यं वा साधयेयम् देहं वा पातयेयम्'' इत्येव तेषां लक्ष्यं बभूव। एतस्मात् एव कारणात् अद्यापि गृहे-गृहे तेषां गौरवगाथा गीयते आदर्शपुरुषाश्च मन्यन्ते। यदि भगवान् शङ्कराचार्यः अहोरात्रं परिश्रमं न अकरिष्यत् समस्तेऽपि भारते दिवानिशं न अभ्रमिष्यत्, स्थले-स्थले विरोधिनां सिद्धान्तं न अखण्डयिष्यत् तर्हि पुनः भारते वैदिकधर्मस्य प्रचारः न अभविष्यत्। गान्धि-सुभाषचन्द्र-चन्द्रशेखरादयः भारतीयाः कठिनपरिश्रमेण समयस्य सदुपयोगं कृत्वा गौराङ्गजनान् देशात् बहिः कृतवन्तः स्वराज्यं च प्राप्तवन्तः तथा च ये छात्राः क्षणं-क्षणं संयोज्य विद्याध्ययने समयस्य सदुपयोगं कृतवन्तः ते एव विद्वान्सः उच्चनागरिकाः, अधिकारिणः वा अभवन्।

**छात्राः** - आचार्य ! प्रकृतिरपि किं समयस्य पालनं शिक्षयति ?

**आचार्यः** - आम् 'प्रकृतिरपि समयस्य पालनं, कार्यपरायणताम् एव उपदिशति निरन्तरम्'। प्रकृतौ यावन्तः पदार्थाः सृष्टाः सन्ति ते सर्वेऽपि अहोरात्रं कार्यसंलग्ना एव दृश्यन्ते। सूर्य-चन्द्राभ्याम् आरभ्य कीट-पतङ्ग-पिपीलिका-पर्यन्तं सर्वेऽपि स्व-स्व व्यापारे व्यापृताः विलोक्यन्ते। अतः प्रकृत्या अपि इयमेव शिक्षा दीयते यत् नहि केनापि समयस्य अनुपयोगः कर्त्तव्यः इति।

अतः अस्माभिः आलस्यं विहाय सर्वदैव समयस्य सदुपयोगः कर्त्तव्यः न तु कदाचित् एकमपि क्षणं व्यर्थं यापनीयम्। यथोक्तम् -

''न कार्यकालमतिपातयेत्''।

## शब्दार्थः

लब्धुम् - प्राप्त करने योग्य। परावर्तयितुम् - लौटाने के लिए। उपार्जयन्ति - कमाते हैं। वोढुम् - ढोने के लिए। गोपयन्ति - छिपाते हैं। बभूव - हुआ। अकरिष्यत् - किया होता। अतिपातयेत् - अधिक लगाएँ।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) देवदुर्लभं किम् ?

(ख) अन्येषां वस्तूनाम् अपेक्षया अधिकः महत्त्वपूर्णः कः ?

(ग) किं परावर्तयितुं न शक्यते ?

(घ) जनाः समयस्य दुरुपयोगं कतिधा कुर्वन्ति ?

(ङ) निष्क्रियाणां भारं वोढुं का नेच्छति ?

**2. एकवाक्येन उत्तरं लिखत -**

(क) मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

(ख) के अप्रयोजनं गृहे-गृहे अटन्ति ?

(ग) प्रकृतिरपि किं शिक्षयति ?

(घ) कीदृशा: छात्रा: उच्चनागरिका: अभवन् ?

(ङ) अस्माभि: किं कर्त्तव्यम् ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) जना: समयस्य दुरुपयोगं कथं कुर्वन्ति ?

(ख) केषां जन्म निरर्थकं भवति ?

(ग) के जना: सर्वत्र तिरस्कृता: भवन्ति ?

**4. प्रदत्तशब्दै: रिक्तस्थानानि पूरयत -**

(निष्क्रियाणां, समय:, कार्यं, सहयोगम्, तनयं)

(क) अन्येषां वस्तूनाम् अपेक्षया ...................अधिक: महत्त्वपूर्ण: वर्तते।

(ख) कर्मभूमि: ............................ भारं वोढुम् नेच्छति।

(ग) पितरौ अपि एतादृशं .................. नाभिनन्दत:।

(घ) .................... वा साधयामि।

(ङ) सर्वे एव तेषां .................... इच्छन्ति।

**5. यथायोग्यं योजयत -**

| 'अ' | 'आ' |
|---|---|
| (क) कार्यं वा साधेययम् | अतिपातयेत् |
| (ख) अधिक: मूल्यवान् | कर्त्तव्य: |
| (ग) न कार्यकालम् | देहं वा पातेययम् |
| (घ) महापुरुषा: | समय: |
| (ङ) समयस्य सदुपयोग: | प्रसिद्धा: |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) अस्माभिः समयस्य सदुपयोगः कर्त्तव्यः। ☐

(ख) परिश्रमः अस्माकं जीवनस्य उन्नत्यै भवति। ☐

(ग) मानवशरीरं देवदुर्लभं नास्ति। ☐

(घ) भगवान् शङ्कराचार्यः अहोरात्रं परिश्रमं कृतवान्। ☐

(ङ) कार्यकालमतिपातयेत्। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत -**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा -कार्येषु | कार्य | सप्तमी | बहुवचनम् |
| (क) विद्वान्सः<br>(ख) अपेक्षया<br>(ग) स्वार्थाय<br>(घ) गृहे | | | |

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| यथा -यथोक्तम् | - | यथा + उक्तम् = | गुणसन्धिः |
| (क) अधिकश्च | | | |
| (ख) यत्रैव | | | |
| (ग) केऽपि | | | |
| (घ) अद्यावधिः | | | |

9. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत -**

यथा - पितरौ - माता च पिता च द्वन्द्वसमासः

(क) कार्यकालम्

(ख) जीवनचरित्रस्य

(ग) महापुरुषाः

(घ) अहोरात्रम्

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत –**

(क) **समयः** अधिकमहत्त्वपूर्णः अस्ति ।

(ख) केचिज्जनाः **समयस्य** दुरुपयोगं कुर्वन्ति ।

(ग) **पितरौ** तनयं नाभिनन्दतः ।

(घ) सर्वे एव **तेषां** सहयोगमिच्छन्ति ।

(ङ) एकमपि **क्षणं** व्यर्थं न यापनीयम् ।

## योग्यताविस्तारः –

- ये महापुरुषाः समयस्य सदुपयोगं कृत्वा देशहिताय समाजहिताय धर्महिताय वा कार्याणि कृतवन्तः तेषां नामानि अन्विष्य लिखत ।
- एवमेव मानवजीवनोपयोगिविषयोपरि संवादलेखनं कुरुत ।

पञ्चदशः पाठः

# भगीरथः

**अस्माकं भारतदेशे बह्व्यः नद्यः सन्ति तासु परमपावनी मुक्तिप्रदायिनी गङ्गा नदी वर्तते। जनाः वदन्ति यत् – ''गङ्गे तव दर्शनान्मुक्तिः'' इति। एषा गङ्गा पूर्वं भूलोके नासीत्। सगरस्य वंशजेन भगीरथेन कठिनतपसा एषा भुवम् आनीता। एषा कथं किमर्थं च भूलोके आनीता इति पाठेऽस्मिन् प्रस्तूयते।**

सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेधयागं कृतवान्। यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

सगरस्य षष्टिसहस्रपुत्राः अश्वम् अन्वेष्टुं सर्वत्र गतवन्तः। अन्ते ते पातालं गतवन्तः। तत्र मुनेः पुरतः ते अश्वं दृष्टवन्तः। मुनिः एव चौरः इति चिन्तयित्वा ते तं निन्दितवन्तः। कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान्। ते भस्मरूपेण तत्र पाताललोके स्थितवन्तः। तेषां सद्गतिः न अभवत्। एतेषां मुक्तिः कथं भवेत् ? पूर्वजानां मुक्तिः वंशजप्रयत्नैः एव सम्भाव्यते इति शास्त्रमतम्।



सगरस्य वंशे भगीरथस्य जननम् अभवत्। सः स्वपूर्वजान् स्वर्गं नेतुं निश्चितवान्। यदा गङ्गायाः जलं भस्म स्प्रक्ष्यति तदा एव सगरपुत्राणां पापस्य नाशः अपि भविष्यति इति भगीरथस्य निश्चयः।

तस्मिन् काले भूलोके गङ्गा न आसीत्। आकाशमार्गे तस्याः प्रवाहं सोढुं भूमिः शक्ता न आसीत्। तां प्रथमतः गृहीतुं परमेश्वरः एव शक्तः आसीत्। तस्मात् ईश्वरं ध्यात्वा भगीरथः तपः कृतवान्। सहस्रवर्षानन्तरम् एव ईश्वरः आकाशगङ्गां स्वजटासु ग्रहीतुम् अङ्गीकृतवान्। एवं सा नदी ईश्वरस्य जटासु प्रथमं पतितवती। आकाशगङ्गा तदा गर्विता आसीत्। ''कथम् एषः ईश्वरः मां धारयितुं शक्तः ?'' इति चिन्तितवती सा। नद्याः गर्वं ज्ञात्वा शिवः तां जटासु एव निक्षिप्तवान्। अतः नद्याः एकः जलबिन्दुः अपि बहिः भूमौ न पतितः।

भगीरथः दुःखितः अभवत्। सः पुनः तपः कृतवान्। शिवः तस्य पुरतः प्रत्यक्षः अभवत्। "हे ईश ! नदीं भूमौ विसृजतु" इति भगीरथः प्रार्थितवान्। तां प्रार्थनाम् अङ्गीकृत्य शिवः नद्याः जलं भूमौ विसृष्टवान्। भगीरथः नदीं भूमितः पातालं नीतवान्। पाताले प्रवहन्ती गङ्गा सगरपुत्राणां भस्मानि स्पृष्टवती। सगरपुत्राः स्वर्गलोकं गतवन्तः।

इत्थं भगीरथस्य प्रयत्नाः अपूर्वाः। सः गङ्गां भूमौ आनीतवान्। अनेन कारणेन एव तस्याः नद्याः भागीरथी इति अन्यत् नाम अस्ति। प्रयत्नविषये उक्तञ्च -

*प्रारभ्यते न खलु विघ्नभयेन नीचैः,*
*प्रारभ्य विघ्नविहता विरमन्ति मध्याः।*
*विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,*
*प्रारभ्य चोत्तमजनाः न परित्यजन्ति ॥*

## शब्दार्थः

असूया - घृणा। दग्धवान् - जला दिया। जननम् - जन्म। स्प्रक्ष्यति - स्पर्श करेगा/करेगी। प्रवाहम् - बहाव को। सोढुम् - सहने के लिए। अङ्गीकारम् - स्वीकृति/सहमति को। आकाशगङ्गा - आकाश की गंगा नदी। गर्विता - घमण्ड युक्त। निक्षिप्तवान् - छिपा लिया। प्रत्यक्षः - प्रगट। विसृजतु- भेजो/विसर्जित करो। विसृष्टवान् - भेजा/विसर्जित किया।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) सूर्यवंशस्य राजा कः आसीत् ?

(ख) यागस्य विघ्नं कर्तुं कः मार्गं चिन्तितवान् ?

(ग) सगरपुत्राः कस्य पुरतः अश्वं दृष्टवन्तः ?

(घ) कस्य वंशे भगीरथस्य जननम् अभवत् ?

(ङ) आकाशगङ्गां शिवः कुत्र निक्षिप्तवान् ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) भगीरथः कान् स्वर्गं नेतुं निश्चितवान् ?

(ख) कं ध्यात्वा भगीरथः तपः कृतवान् ?

(ग) भगीरथः नदीं भूमितः कुत्र नीतवान् ?

(घ) कस्याः अपरं नाम भागीरथी ?

(ङ) के कार्यं प्रारभ्य न परित्यजन्ति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) देवेन्द्रः किमर्थं सगराय असूयति स्म ?

(ख) भगीरथः किं निश्चयं कृतवान् ?

(ग) नीचमध्यमोत्तमजनानां लक्षणं किम् ?

**4. उचितशब्देन रिक्तस्थानानि पूरयत -**

(क) सगरः ......................... कृतवान्। (गोमेधयागं/अश्वमेधयागं)

(ख) कार्यं प्रारभ्य ................ विरमन्ति। (मध्याः/नीचाः)

(ग) भगीरथः पुनः ............. कृतवान् । (जपः/तपः)

(घ) गङ्गा सगरपुत्राणां ....................... स्पृष्टवती। (शरीराणि/भस्मानि)

(ङ) भगीरथः .................... भूमौ आनीतवान्। (गङ्गां/यमुनां)

**5. यथायोग्यं योजयत -**

| 'अ' | 'आ' |
|---|---|
| (क) सगरस्य | गर्विता |
| (ख) कपिलमुनिः | षष्टिसहस्रपुत्राः |
| (ग) आकाशगङ्गा | न प्रारभ्यते |
| (घ) भगीरथस्य प्रयत्नाः | कुपितः जातः |
| (ङ) नीचैः | अपूर्वाः |

**6. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षम् ''न'' इति लिखत -**

(क) सगरः अश्वमेधयागं न कृतवान्। ☐

(ख) कपिलमुनिः ध्याने आसीत्। ☐

(ग) सगरपुत्राः अश्वम् अन्वेष्टुं न गतवन्तः। ☐

(घ) सगरस्य पुत्राः भस्मीभूताः जाताः। ☐

(ङ) भगीरथः गङ्गां भूमौ न आनीतवान्। ☐

**7. उदाहरणानुसारं शब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा - सगरः | सगर | प्रथमा | एकवचनम् |
| (क) यागस्य | | | |
| (ख) ध्याने | | | |
| (ग) मुनेः | | | |
| (घ) अश्वम् | | | |
| (ङ) भूलोके | | | |
| (च) भूमौ | | | |
| (छ) जटासु | | | |

**8. उदाहरणानुसारं धातुं प्रत्ययं च पृथक् कुरुत -**

यथा - कृतवान्    कृ + क्तवतु

(क) कर्तुम्

(ख) नेतुम्

(ग) चिन्तितवान्

(घ) पतित:

(ङ) ज्ञातवान्

**9. अधोलिखितशब्दानां समानार्थकशब्दान् लिखत -**

यथा -    शक्त: - समर्थ:

(क) राजा

(ख) मुनि:

(ग) गङ्गा

(घ) भूमि:

(ङ) शिव:

**10. निम्नलिखित-अव्ययानि प्रयुज्य वाक्यनिर्माणं कुरुत -**

यथा -    एकदा - नृप: एकदा यागं कृतवान्।

(क) तत्र

(ख) एव

(ग) यदा

(घ) पुरत:

(ङ) अपि

## योग्यताविस्तार: -

- गङ्गाया: विषये अन्या: कथा: अन्विष्य लिखत पठत च।
- एवम् अन्या: अपि शिक्षाप्रदा: कथा: पठत; तथा च निम्नलिखितौ श्लोकौ कण्ठस्थं कुरुत -
  - *''गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि।*
    *मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥''*
  - *मातर्गङ्गे तरलतरङ्गे सततं वारिधिवारिणि सङ्गे॥*
    *मम तव तीरे पिबतो नीरं 'हरि हरि' जपत: पततु शरीरम्॥*

**षोडश: पाठ:**

# ब्रह्मवादिनी मैत्रेयी

**प्राचीनकालादेव स्त्रीणाम् आदर: लोके विद्यते। वैदिककाले उपनिषत्काले च तासाम् अध्ययनस्य उत्तमा व्यवस्था आसीदेव। उपनिषत्काले स्त्रीशिक्षाया: महत्त्वम् अधिकम् आसीत्। ता: वेदाध्ययनम् अपि कुर्वन्ति स्म। तासाम् उपनयनसंस्कार: अपि भवति स्म। मध्ययुगे परकीयाक्रमणै: तासां स्थिति: शोचनीयतां गता। स्त्रीशिक्षाया: मार्ग: अवरुद्ध: अभवत्। परन्तु प्राचीनकाले तासां स्थिति: उत्तमा आसीत्। नार्य: न केवलं पठन्ति स्म अपितु पाठयन्ति स्म। मैत्रेयी न केवलं शिक्षिता तपस्विनी स्त्री अपितु प्रसिद्धा अध्यापिका ब्रह्मवादिनी चासीत्। उपनिषत्काले तस्या: महती प्रतिष्ठा आसीत्। बृहदारण्यकोपनिषदि ब्रह्मवादिन्या: मैत्रेय्या: विद्वत्ताया: विस्तरेण वर्णनमस्ति। तामेव सङ्क्षेपेण प्रस्तौति पाठोऽयम्।**

भारतीयसमाजे नारी सदैव सम्मानार्हा पूज्या च अस्ति। अत एवोक्तम् -

*यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।*
*यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया: ॥*

यत्र नारीणाम् आदर: भवति तत्र देवता: स्वयं निवसन्ति। परं यत्र ता: अपमानिता: भवन्ति तत्र सर्वाणि कार्याणि विफलानि भवन्ति।

भारते वैदिककाले उपनिषत्काले च नारी शिक्षिता आसीत्। सा न केवलम् अध्ययनम् अपितु सूक्तरचना: अपि करोति स्म। वैदिककाले अपाला, घोषा, विश्ववारा, मैत्रेयी एतादृश्य: ब्रह्मवादिन्य: आसन्। उपनिषत्काले ता: जीवनविषयकं जगद्विषयकञ्च ज्ञानम् अधिगन्तुम् इच्छन्ति स्म। उपनिषत्काले वेदाध्ययनस्य कृते तासाम् उपनयनसंस्कार: अपि क्रियते स्म। ''पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते'' इत्यनेन स्मृतिवचनेन तद् ज्ञायते।

याज्ञवल्क्यस्य भार्याद्वयम् आसीत्। कात्यायनी मैत्रेयी च। कात्यायनी गृहकर्मकुशला आश्रमव्यवस्थां पश्यति स्म। मैत्रेयी आध्यात्मिकरुचिसम्पन्ना वेदाध्ययनं शास्त्रचर्चां च कुर्वती आसीत्। महाराजजनक: तस्या: पाण्डित्यम् अध्यापनकौशलं ज्ञात्वा सीताम् अध्यापयितुं तां नियोजितवान्। मैत्रेयी सीतायै वेदानां संस्काराणाम् इन्द्रियनिग्रहस्य च ज्ञानं दत्तवती। एतादृशेण अध्यापनेन दृढसंस्कारै: च सीता स्वजीवने सङ्कटकाले अपि न विचलिता अभवत्।

एकदा याज्ञवल्क्य: मैत्रेयीं कात्यायनीं च आहूतवान् तथा उक्तवान् - ''अद्य अहं गृहस्थाश्रमं त्यक्त्वा संन्यासाश्रमं स्वीकरोमि। मम गमनादनन्तरं युवयोर्मध्ये कलह: मा भवतु। अत: सम्पत्तिविभाजनं कृत्वा एव गच्छामि'' इति। पत्यु: निर्णयं श्रुत्वा मैत्रेयी चिन्तामग्ना अभवत्। यदि मम सर्वाधार: पति: संन्यासं स्वीकरोति तर्हि एतेन नश्वरेण धनेन किम् ? इति विचिन्त्य सा उक्तवती - ''भगवन् अनेन ऐश्वर्येण युक्तां पृथिवीं प्राप्य अहम् अमृता भविष्यामि वा ?'' नहि। ''धनेन धनिक: मनुष्य: यथा जीवनं सुखेनैव यापयति तथैव भवत्या: अपि जीवनं सुखमयं भवेत्। परम् एतेन धनेन अमृतत्वं न प्राप्यते'' इति याज्ञवल्क्य: उक्तवान्।

तत् श्रुत्वा मैत्रेयी अवदत् - ''यदि वित्तेन नाहम् अमृता भविष्यामि तर्हि धनं स्वीकृत्य किं करोमि ? यत् अमृतत्वस्य साधनम् अस्ति तद् वदतु भवान्।''

स्वपत्न्या: ब्रह्मजिज्ञासां ज्ञात्वा याज्ञवल्क्य: आत्मनिरूपणम् आरब्धवान् -''मैत्रेयि ! पत्न्या: कृते पति: प्रिय: भवति, पुत्र: प्रिय: भवति। परं सा पुत्रस्य कृते पत्यु: कृते वा प्रिया न भवति, अपितु आत्मन: कृते प्रिया भवति। तथैव धनं प्रियं भवति, देवा: प्रिया: भवन्ति। परं सर्वम् आत्मन: कृते एव। यस्मिन् आत्मनि वयं स्निह्याम: स: एक: एव। अयं ब्राह्मण:, अयं क्षत्रिय: इति एतेषां शरीराणि भिन्नानि परन्तु तेषु शरीरेषु सर्वेषु आत्मा एक एव। य: सर्वाणि भूतानि आत्मन: भिन्नानि पश्यति स: मुक्तिं प्राप्तुं न शक्नोति। सर्वेषु शरीरेषु एक: एव आत्मा इति य: जानाति स: मुक्तिं प्राप्नोति। अयम् आत्मा एव अखिलस्य विश्वस्य आधार: इति। 'कथम्' इति तं मैत्रेयी अपृच्छत्।

याज्ञवल्क्य: उदाहरणेन स्पष्टं कृतवान् - ''यथा सर्वस्य जलस्य समुद्र: एव आधार:। समुद्रात् निर्मितं जलं पुन: समुद्रे एव विलीनं भवति। तथैव ब्रह्मतत्त्वात् निर्मितं विश्वं तत्रैव विलीनं भवति। इदं ब्रह्मतत्त्वं सम्पूर्णविश्वे व्याप्तम् अस्ति। यथा शर्करा जले सर्वत्र समानरूपेण व्याप्ता भवति तथैव आत्मा अपि अन्तर्बाह्यव्याप्त:। अयमात्मा सर्वेषां देहे तिष्ठति। देह: नश्वर:। यदा स: देहे तिष्ठति तदा तस्य भिन्नानि नामानि सन्ति। देहनाशादनन्तरम् आत्मा देहात् बहि: निर्गच्छति, तदा तस्य कापि संज्ञा नास्ति। स: न नश्यति। तत्र विकारा: अपि न भवन्ति। एकमेव अद्वितीयं परब्रह्म। यदा तस्य ज्ञानं भवति तदा सर्वं विदितं भवति। अमृतत्वं च प्राप्यते।

अस्य अमृतत्वस्य साधनं किम् ? इति मैत्रेयी अपृच्छत्। तदा याज्ञवल्क्य: उक्तवान् - आत्मसाक्षात्कार: एव अमृतत्वस्य साधनम्। इति ब्रह्मनिरूपणं कृत्वा याज्ञवल्क्य: संन्यासं स्वीकृतवान्। एवं ब्रह्मवादिनी मैत्रेयी याज्ञवल्क्यात् ब्रह्मज्ञानं प्राप्तवती।

नास्ति कुत्रचित् एतादृशी ब्रह्मवादिनी स्त्री: या धनं विहाय ब्रह्मज्ञानम् इच्छति। अत:मैत्रेयी भारतीयसंस्कृतौ आदर्शभूता।

## शब्दार्थ:

सम्मानार्हा - सम्मान के योग्य (स्त्री)। रमन्ते - आनन्दित होते हैं। सूक्तरचना: - वैदिक सूक्तों की रचना। एतादृश्य: - इस प्रकार की। ब्रह्मवादिन्य: - ब्रह्मतत्त्वकी जानकारी रखने वाली/अध्यापन कराने वाली। अधिगन्तुम् - जानने के लिए। मौञ्जीबन्धनम् - मूंज की घास का बना कटि सूत्र पहनना/यज्ञोपवीत संस्कार। भार्याद्वयम् - दो पत्नियाँ। पाण्डित्यम् - ज्ञान को। अध्यापयितुम् - पढ़ाने के लिए। इन्द्रियनिग्रहस्य - इन्द्रियों के संयम का। आहूतवान् - बुलाया। गमनादनन्तरम् - जाने के बाद। युवयोर्मध्ये - तुम दोनों के बीच। पत्यु: - पति का। सर्वाधार: - सम्पूर्ण आधार। विचिन्त्य - सोचकर। अमृता - जन्म-मृत्यु के बन्धन से रहित (स्त्री.)। यापयति - बिताता है। आत्मन: - स्वयं का। आत्मनि - आत्मा में। भिन्नानि - अलग-अलग हैं। भूतानि - प्राणी। अखिलस्य - सम्पूर्ण का। ब्रह्मतत्त्वात् - ब्रह्मतत्त्व से । शर्करा - शक्कर। अन्तर्बाह्यव्याप्त: - अन्दर और बाहर/शरीर व संसार में प्याप्त। नश्वर: - नाशवान्। संज्ञा - नाम। विकारा: - दोष। विदितम् - ज्ञात। आत्मसाक्षात्कार: - स्वयं की जानकारी/स्वयं को जानना। ब्रह्मनिरूपणम् - ब्रह्म का निरूपण। विहाय - छोड़कर।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत –**

(क) भारतीयसमाजे का सदैव पूज्या अस्ति ?

(ख) मैत्रेयी कस्य पत्नी आसीत् ?

(ग) जनक: सीताम् अध्यापयितुं कां नियोजितवान् ?

(घ) आश्रमव्यवस्थां का पश्यति स्म ?

(ङ) सर्वस्य जलस्य आधार: क: ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) देवता: कुत्र रमन्ते ?

(ख) मैत्रेयी सीतायै केषां ज्ञानं दत्तवती ?

(ग) धनेन किं न प्राप्यते ?

(घ) अमृतत्वस्य साधनं किम् ?

(ङ) क: मुक्तिं प्राप्तुं न शक्नोति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) देवता: कुत्र रमन्ते ? कुत्र न रमन्ते ?

(ख) उपनिषत्काले भारते नारीणां दशा कीदृशी आसीत् ?

(ग) याज्ञवल्क्य: मैत्रेयीं कात्यायनीं च आहूय किम् उक्तवान् ?

4. **प्रदत्तशब्दै: रिक्तस्थानानि पूरयत –**

(अद्वितीयं, आत्मा, मैत्रेयी, अमृतत्वस्य, वेदाध्ययनं)

(क) सर्वेषु शरीरेषु ................... एक एव।

(ख) मैत्रेयी ........................... कुर्वती आसीत्।

(ग) एकमेव ....................... परब्रह्म ।

(घ) याज्ञवल्क्यात् ...................... ब्रह्मज्ञानं प्राप्तवती।

(ङ) आत्मसाक्षात्कार: एव ....................... साधनम्।

5. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) आत्मा एव अखिलविश्वस्य आधार: अस्ति। ☐

(ख) धनेन अमृतत्वं प्राप्यते। ☐

(ग) वैदिककाले नारी शिक्षिता आसीत्। ☐

(घ) उपनिषत्काले नारीणाम् उपनयनसंस्कार: अपि क्रियते स्म। ☐

(ङ) कात्यायनी सीतायै ज्ञानं दत्तवती। ☐

6. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा - संस्कारैः | संस्कार | तृतीया | बहुवचनम् |
| (क) समुद्रे | | | |
| (ख) सर्वस्य | | | |
| (ग) एतेषाम् | | | |
| (घ) पत्युः | | | |

7. **अधोलिखितशब्दानां धातुं लकारं च लिखत –**

| शब्दः | धातुः | लकारः |
|---|---|---|
| यथा -भवति | भू (भव्) | लट्लकारः |
| (क) ज्ञायते | | |
| (ख) तिष्ठति | | |
| (ग) पश्यति | | |
| (घ) शक्नोति | | |

8. **अधोलिखितशब्दानां धातुं प्रत्ययञ्च पृथक् कुरुत –**

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| यथा -ज्ञात्वा | ज्ञा | क्त्वा |
| (क) अधिगन्तुम् | | |
| (ख) कृतवान् | | |
| (ग) विचिन्त्य | | |
| (घ) त्यक्त्वा | | |

9. **अधोलिखितशब्दानां पर्यायशब्दान् लिखत –**

यथा -नारीणाम् स्त्रीणाम्

(क) सङ्कटकाले

(ख) उपनयनसंस्कारः

(ग) समुद्रे

(घ) पतिः

10. **अव्ययैः वाक्यनिर्माणं कुरुत -**

यथा -यदा - तदा यदा रामः पठति तदा कृष्णः पठति।

(क) कृते

(ख) एव

(ग) बहिः

(घ) यत्र

## योग्यताविस्तारः -

- वैदिककाले याः अन्याः ब्रह्मवादिन्यः आसन् तासां विषये अन्विष्य पठत।
- वैदिककाले नारीणां दशा भारतवर्षे कीदृशी आसीत् लिखत।

सप्तदशः पाठः

# चाणक्यनीतिः



संस्कृतसाहित्ये नैतिकोपदेशानां दीर्घपरम्परा विद्यते। नीतिवचनानि व्यवहार–ज्ञानमहाक्षेत्रे महार्घ्यरत्नानि सन्ति। अस्माकं जीवनस्य मूल्याङ्कनं नैतिकमूल्येनैव भवति। चणकपुत्रः चाणक्यः महान् नीतिज्ञः आसीत्। 'कौटिल्यमहामात्यविष्णुगुप्त' इति नाम्ना सः प्रसिद्धः। पाठेऽस्मिन् तस्य 'चाणक्यनीतिरिति' ग्रन्थतः श्लोकाः उद्धृताः।

*सत्येन धार्यते पृथ्वी सत्येन तपते रविः।*
*सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥1॥*

**अन्वयः** - पृथ्वी सत्येन धार्यते, रविः सत्येन तपते, वायुः सत्येन वाति, सर्वं च सत्ये प्रतिष्ठितम् (अस्ति)।

**शब्दार्थः** -

| | | |
|---|---|---|
| धार्यते | - | धारण की जाती है |
| तपते | - | उष्णता प्रदान करता है |
| वाति | - | बहता है |
| प्रतिष्ठितम् | - | स्थित है |

*मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।*
*मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत् ॥2॥*

**अन्वयः** - मनसा चिन्तितं कार्यं वाचा न एव प्रकाशयेत्, गूढं मन्त्रेण रक्षयेत्। कार्ये च अपि नियोजयेत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| मनसा | - | मन के द्वारा |
| वाचा | - | वाणी के द्वारा |
| प्रकाशयेत् | - | प्रकट करना चाहिए |
| गूढम् | - | गोपनीय |
| मन्त्रेण | - | विचारपूर्वक |
| नियोजयेत् | - | लगाना चाहिए |

*पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः।*
*नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः ॥3॥*

**अन्वयः** - बुधैः पुत्राः विविधैः शीलैः सततं नियोज्याः। (यतो हि) शीलसम्पन्नाः नीतिज्ञाः कुलपूजिताः भवन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| बुधैः | - | विद्वानों के द्वारा |
| शीलैः | - | सदाचरणों के द्वारा |
| नियोज्याः | - | लगाना चाहिए |
| नीतिज्ञाः | - | नीतिशास्त्र को जानने वाले |
| कुलपूजिताः | - | कुल में सम्मानित/जनसमूह में पूजित |

*को हि भार: समर्थानां किं दूरं व्यवसायिनाम् ।*

*को विदेश: सविद्यानां क: पर: प्रियवादिनाम् ॥4॥*

**अन्वय:** - हि समर्थानां क: भार: ? व्यवसायिनां किं दूरम् ? सविद्यानां क: विदेश: ? प्रियवादिनां क: पर: ? (अर्थात् कोऽपि नास्ति)।

**शब्दार्थ:** -

| | | |
|---|---|---|
| समर्थानाम् | - | सक्षम लोगों के लिए |
| व्यवसायिनाम् | - | उद्यमशील लोगों के लिए |
| सविद्यानाम् | - | विद्या से युक्त लोगों के लिए |
| पर: | - | शत्रु/पराया |

*दरिद्रता धीरतया विराजते,*

*कुवस्त्रता शुभ्रतया विराजते ।*

*कदन्नता चोष्णतया विराजते,*

*कुरूपता शीलतया विराजते ॥5॥*

**अन्वय:** - दरिद्रता धीरतया विराजते, कुवस्त्रता शुभ्रतया विराजते, कदन्नता उष्णतया विराजते, कुरूपता च शीलतया विराजते ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| धीरतया | - | धैर्य धारण करने से |
| कदन्नता | - | निम्न कोटि का अन्न |
| विराजते | - | सुशोभित होता/होती है |

*धनहीनो न हीनश्च धनिक: स: सुनिश्चय: ।*

*विद्यारत्नेन यो हीन: स: हीन: सर्ववस्तुषु ॥6॥*

**अन्वय:** - य: धनहीन: स: हीन: न, (अपितु) स: सुनिश्चय: धनिक:, यः विद्यारत्नेन हीन: स: सर्ववस्तुषु हीन: (अस्ति)।

**शब्दार्थ:** -

| | | |
|---|---|---|
| धनहीन: | - | धन से रहित |
| सुनिश्चय: | - | निश्चयपूर्वक |
| सर्ववस्तुषु | - | सभी वस्तुओं में |

*कर्मायत्तं फलं पुंसां बुद्धि: कर्मानुसारिणी ।*

*तथापि सुधियश्चार्या: सुविचार्यैव कुर्वते ॥7॥*

**अन्वय:** - पुंसां कर्मायत्तं फलम्, बुद्धि: कर्मानुसारिणी, तथापि सुधिय: आर्या: च सुविचार्य एव कुर्वते ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| पुंसाम् | - | मनुष्यों का |
| कर्मायत्तम् | - | कर्म के अनुसार |
| सुधिय: | - | विद्वान् लोग |
| आर्या: | - | श्रेष्ठ लोग |
| कुर्वते | - | करते हैं |

*छिन्नोऽपि चन्दनतरुर्न जहाति गन्धं,*

*वृद्धोऽपि वारणपतिर्न जहाति लीलाम् ।*

*यन्त्रार्पितो मधुरतां न जहाति चेक्षुः,*

*दीनोऽपि न त्यजति शीलगुणान् कुलीनः ॥8॥*

**अन्वयः** - छिन्नः चन्दनतरुः अपि गन्धं न जहाति, वृद्धः वारणपतिः अपि लीलां न जहाति, यन्त्रार्पितः इक्षुः मधुरतां न जहाति, कुलीनः च दीनः अपि शीलगुणान् न त्यजति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| छिन्नः | - | कटा हुआ |
| जहाति | - | छोड़ता है |
| वारणपतिः | - | हाथियों का स्वामी |
| यन्त्रार्पितः | - | यन्त्र (कोल्हू) में डाला गया |
| इक्षुः | - | गन्ना |
| शीलगुणान् | - | सच्चरित्रादि गुणों को |
| त्यजति | - | छोड़ता है |

*एकेनाऽपि सुपुत्रेण विद्यायुक्तेन साधुना ।*

*आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥9॥*

**अन्वयः** - एकेन सुपुत्रेण विद्यायुक्तेन साधुना अपि सर्वं कुलम् आह्लादितं, यथा चन्द्रेण शर्वरी (आह्लाद्यते)।

**शब्दार्थः** -

| | | |
|---|---|---|
| सुपुत्रेण | - | सद्गुणी पुत्र के द्वारा |
| साधुना | - | सज्जन के द्वारा |
| आह्लादितम् | - | प्रसन्न किया गया |
| शर्वरी | - | रात्रि |

*परोपकरणं येषां जागर्ति हृदये सताम् ।*

*नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे-पदे ॥10॥*

**अन्वयः** - येषां सतां हृदये परोपकरणं जागर्ति तेषां विपदः नश्यन्ति, पदे-पदे सम्पदः स्युः ।

**शब्दार्थः** -

| | | |
|---|---|---|
| सताम् | - | सज्जनों के |
| परोपकरणम् | - | दूसरों का भला करना |
| जागर्ति | - | जागृत रहता है |
| विपदः | - | विपत्तियाँ |
| पदे-पदे | - | कदम-कदम पर |
| स्युः | - | हों |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) रविः केन तपते ?

(ख) दरिद्रता कया विराजते ?

(ग) कर्मानुसारिणी का ?

(घ) केन शर्वरी आह्लादिता ?

(ङ) कुरूपता कया विराजते ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) वाचा किं न प्रकाशयेत् ?

(ख) कैः पुत्राः विविधैः शीलैः नियोज्याः ?

(ग) कः सर्ववस्तुषु हीनः ?

(घ) कुलीनः दीनोऽपि कान् न त्यजति ?

(ङ) छिन्नोऽपि चन्दनतरुः किं न जहाति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) सत्येन सर्वं कथं प्रतिष्ठितम् ?

(ख) किमर्थं बुधैः पुत्राः विविधैः शीलैः नियोज्याः ?

(ग) पदे-पदे केषां सम्पदः स्युः ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(गूढम्, सत्ये, धनहीनो, लीलाम्, सविद्यानाम्)

(क) सर्वं ........................ प्रतिष्ठितम्।

(ख) मन्त्रेण रक्षयेद् .............................।

(ग) को विदेशः ............................।

(घ) ............................. न हीनश्च।

(ङ) वृद्धोऽपि वारणपतिर्न जहाति ........................।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
| --- | --- |
| (क) दरिद्रता | इक्षुः |
| (ख) कदन्नता | शीलतया |
| (ग) कुवस्त्रता | धीरतया |
| (घ) कुरूपता | उष्णतया |
| (ङ) मधुरताम् | शुभ्रतया |

6. **शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षम् "न" इति लिखत -**

(क) सत्येन वायु: वाति। ☐

(ख) प्रियवादिनां कोऽपि न पर: । ☐

(ग) कदन्नता उष्णतया न विराजते। ☐

(घ) कर्मायत्तं पुंसां फलम्। ☐

(ङ) छिन्न: चन्दनतरु: गन्धं जहाति। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा - पुत्रा: | पुत्र | प्रथमा | बहुवचनम् |
| (क) सत्येन | | | |
| (ख) समर्थानाम् | | | |
| (ग) मधुरताम् | | | |
| (घ) हृदये | | | |

8. **निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा - भवन्ति | भू (भव्) | लट् | प्रथमपुरुष: | बहुवचनम् |
| (क) धार्यते | | | | |
| (ख) रक्षयेत् | | | | |
| (ग) विराजते | | | | |
| (घ) स्यु: | | | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | | विच्छेद: | सन्धिनाम |
|---|---|---|---|
| यथा -वायुश्च | = | वायु: + च | विसर्गसन्धि: |
| (क) कर्मानुसारिणी | | | |
| (ख) वृद्धोऽपि | | | |
| (ग) एकेनाऽपि | | | |
| (घ) विपदस्तेषाम् | | | |

10. **अधोलिखितसमासानां विग्रहं कृत्वा समासनाम लिखत -**

यथा -धनहीन: धनेन हीन: तृतीया तत्पुरुष:

(क) सविद्यानाम्

(ख) वारणपति:

(ग) कुलपूजिता:

(घ) विद्यारत्नेन

11. **प्रदत्तश्लोकान्वयस्य पूर्तिं कुरुत -**

बुधै: ............ विविधै: शीलै: ...................... । (यतो हि)

...................... नीतिज्ञा: .................... भवन्ति ।

## योग्यताविस्तार: -

- पाठे समागतान् श्लोकान् कण्ठस्थं कुरुत ।
- ''चाणक्यनीति:'' इत्यस्मात् पुस्तकात् चित्वा (पाठे समागतान् श्लोकान् विहाय) अन्यान् दशश्लोकान् लिखत ।
- चाणक्येन विरचितानि अन्यानि पुस्तकानि पठत ।
- चाणक्येतरदशनीतिश्लोकान् लिखत ।

अष्टादशः पाठः

# महाराजः छत्रसालः

**''वीरभोग्या वसुन्धरा'' इत्याभाणकं प्रसिद्धम् अस्ति। इयं भारतभूमिः सनातनकालादेव वीरप्रसूरिति सर्वसम्मतम्। यदा-यदा वसुन्धरेयम् आक्रमणकारिभिः, लुण्ठकैः भूरिभारभराक्रान्ता भवति तदा-तदा भगवदनुग्रहेणैव वीरपुरुषाः समवतीर्य मातृभूमिं परतन्त्रताजालात् मोचयित्वा सनातनम् आदर्शं स्थापयन्ति। परतन्त्रताकाले यैः शौर्यं, बलिदानं, पराक्रमं, राष्ट्रभक्तिञ्चाधृत्य अनुकरणीयं जीवनं यापितं तेषु महाराजः छत्रसालः अद्वितीयः। एतस्यैव महापुरुषस्य जीवनमधिकृत्य पाठोऽयं प्रस्तूयते।**

सम्प्रति अस्माकं देशोऽयं स्वतन्त्रोऽस्ति। किन्तु स्वतन्त्रताप्राप्त्यै परतन्त्रताकालादेव समये-समये राष्ट्रभक्तैः अनेकैः वीरपुरुषैः स्वस्य जीवनस्य आहुतिरपि प्रदत्तेति। गौराङ्गवैदेशिकेभ्यः पूर्वं यदा भारतदेशः मुगलैः आक्रान्तः आसीत् तदा मुगलैः सह ये पराक्रमशालिनः युद्धं कृतवन्तः तेषु महाराजशिववीरः, महाराणाप्रतापः, राज्ञीलक्ष्मीबाई, वीरपुङ्गवाः छत्रसालप्रभृतयः अप्रतिमाः योद्धारः आसन्। एते मातृभूमिं पराधीनतापाशात् विमुक्तये स्वीयं सर्वस्वं हुतवन्तः।

''बुन्देलकेसरी'' इति विख्यातस्य छत्रसालस्य जन्म (1649) एकोनपञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूरपर्वतीयक्षेत्रे (मोर पहाड़ी) लिधौराग्रामसमीपे अभूवत। छत्रसालस्य मातर्नाम लाल कुँवर (सारन्धादेवी)पितुर्नाम च श्रीचम्पतरायः इत्यासीत्। अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म। यथासमये एतदर्थम् एव छत्रसालः शिववीरमहाराजम् अपि मिलितवान्। तस्मै शिववीरोऽपि सर्वविधं साहाय्यं कर्तुं वचनम् अयच्छत्। तथा च स्वतन्त्रतायै योद्धुं स्वाशीर्वादस्वरूपं ''भवानीति'' नामकं कृपाणम् अपि दत्तवान्।

औरङ्गजेबस्य, अन्येषां राज्ञां च शक्तिम् अविगणय्य जनसहयोगेन छत्रसालः युद्धं कृतवान् विजयश्रियम् अपि अवाप्तवान्। असौ सेनानी सर्वप्रथमं युद्धे चित्रकूटात् गोपाचलनगरं (ग्वालियरम्) यावत् तथा च कालपीतः गढ़ाकोटा यावत् निजं प्रभुत्वं संस्थापयामास। अनन्तरं सः पन्नाजनपदस्य गोंडजातीयान् राज्ञः पराजित्य पन्नानगरं राजधानीम् अकरोत्।

प्रसिद्धः स्वामिप्राणनाथः अस्य गुरुः आसीत्। प्रसन्नः गुरुः छत्रसालं ''महाराज'' इत्युपाधिना विभूष्य आशीर्वादं प्रदत्तवान्, यत् -

*राज्ये त्वदीये नृप ! छत्रसाल ! क्षोणिस्सदा कम्पमयी विभातु।*
*अश्वः त्वदीयः समियात् तु यत्र, भोस्तत्र साफल्यमवाप्नुहि त्वम्॥*

यदा औरङ्गजेबः दक्षिणभारते व्यापृतः आसीत् तदा युद्धकौशलेन असौ बघेलखण्ड-मालव-राजस्थान-पञ्चाम्बुप्रदेशपर्यन्तं क्षेत्रं स्वाधिपत्ये कृतवान्। मुगलशासकः इमं मानिनं प्रान्ताधिपतित्वं ''सूबेदारी'' इति दातुम् ऐच्छत् तदा अयं न्यषेधयत्। एकदा महोबा - ''जैतपुरनगरयोः मुगलशासने जाते सत्ययं पेशवाबाजीरावाय सहायतार्थम् एकं पत्रं प्रेषितवान्। बाजीरावसाहाय्येन सः पराजितं भूभागं विजितवान्। विजयेन आह्लादितोऽयं पेशवाबाजीरावम् औरसपुत्रमिव मत्वा विजितराज्यस्य तृतीयभागं तस्मै सहर्षं प्रादात्।''

छत्रसालस्य शौर्येण, राष्ट्रभक्त्या, उदारतया च प्रभावितो हिन्दीभाषाया: महाकवि: भूषण: ''छत्रसालदशक'' इति वीररसनिबद्धां काव्यरचनाम् अकरोत् । छत्रसाल: काव्यसाहित्यशास्त्रसम्मानार्थं भूषणमहाकवे: शिविकाम् अपि उत्तोलयत् । द्वयशीतिवर्षस्य अवस्थायाम् एकत्रिंशदुत्तरसप्तदशशततमे (1731) खीस्ताब्दे ''मऊसहानिया'' इत्यस्य तालपरिसरे एष: क्षणभङ्गनिष्ठं शरीरम् अत्यजत् । अधुना स: पाञ्चभौतिकशरीरेण नास्ति परन्तु यश: शरीरेण सर्वदा अस्मान् भारतीयान् प्रेरयन् राष्ट्रभक्तिभावं च शिक्षयन् तिष्ठति एव । अयं देश: जन्मभूमिसंरक्षकस्य महापराक्रमशालिन: छत्रसालस्य सदैव ऋणी अस्ति । विजयतेतरां महाराज: छत्रसाल: ।

## शब्दार्थ:

सम्प्रति - इस समय । वीरपुङ्गव: - वीरों में श्रेष्ठ । पराधीनतापाशात् - गुलामी के जाल से । विमुक्तये - मुक्ति के लिये । सर्वस्वम् - अपना सब कुछ । हुतवन्त: - जला दिया । विमोक्तुम् - मुक्त करने के लिये । प्रयतते स्म - प्रयास कर रहा था । एतदर्थम् - इसके लिये । मिलितवान् - मिला । सर्वविधम् - सब प्रकार का । साहाय्यम् - सहायता । कर्त्तुम् - करने के लिये । अयच्छत् - दिया । अन्येषाम् - दूसरों के । अविगणय्य - बिना गणना करके । अवाप्तवान् - प्राप्त किया । प्रभुत्वम् - शासकत्व । संस्थापयामास - स्थापित किया । पराजित्य - पराजित करके । विभूष्य - विभूषित करके । त्वदीये - तुम्हारे । क्षोणि: - पृथिवी । विभातु - प्रकाशित हो । समियात् - जाये (गमन करे) । अवाप्नुहि - प्राप्त करो । व्यापृत: - व्यस्त । ऐच्छत् - इच्छा की, चाहा । न्यषेधयत् - मना कर दिया । प्रादात् - दे दिया । शिविकाम् - पालकी को । उत्तोलयत् - उठाया । अत्यजत् - त्याग दिया । क्षणभङ्गनिष्ठम् - क्षण भर में नष्ट होने वाला । यश:शरीरेण - यशरूपी शरीर से । शिक्षयन्- शिक्षा (सीख) देते हुए । एव - ही । विजयतेतराम् - विजयी हों ।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) छत्रसालस्य पितु: नाम किम् ?

(ख) छत्रसालस्य जन्म कस्मिन् ग्रामे अभवत् ?

(ग) 'बुन्देलकेसरी' इति नाम्ना क: प्रसिद्ध: ?

(घ) शिववीर: छत्रसालाय किं नामकं कृपाणम् अयच्छत् ?

(ङ) भूषण: कस्या: भाषाया: महाकवि: आसीत् ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) योद्धार: किमर्थं सर्वस्वं हुतवन्त: ?

(ख) छत्रसालस्य जन्म कस्मिन् जनपदे अभवत् ?

(ग) छत्रसाल: कस्य शिष्य: आसीत् ?

(घ) कान् पराजित्य छत्रसाल: पन्नानगरं राजधानीम् अकरोत् ?

(ङ) गुरुणा छत्रसाल: केन उपाधिना विभूषित: ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) के-के वीराः भारतस्वतन्त्रतायै मुगलैः सह अयुध्यन् ?

(ख) बाल्यकालादेव छत्रसालः किमर्थं प्रयतते स्म ?

(ग) छत्रसालस्य साहित्यिकं प्रेम कथं ज्ञायते ?

5. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(छत्रशालदशक, द्वयशीतिः, छत्रसालः, सूबेदारी, भवानी)

(क) मुगलशासकः इमं ............................ इति दातुम् ऐच्छत्।

(ख) शिववीरः तस्मै .......................... इति नामकं कृपाणं समर्पितवान्।

(ग) भूषणः ............................. इति काव्यरचनाम् अकरोत्।

(घ) भारतमातृभूः संरक्षकः ............................... आसीत्।

(ङ) छत्रसालः ................................. वर्षपर्यन्तम् अजीवत्।

6. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) छत्रसालस्य मातुर्नाम | 1649 |
| (ख) छत्रसालस्य जन्मख्रिस्ताब्दः | पन्नानगरम् |
| (ग) छत्रसालस्य राजधानी | सारन्धादेवी |
| (घ) छत्रसालस्य जन्मस्थलम् | 1731 |
| (ङ) छत्रसालस्य निधनख्रिस्ताब्दः | ककरकचनयग्रामः |

7. **निम्नलिखितक्रियापदानां धातुं, लकारं, पुरुषं, वचनं च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा - आसीत् | अस् | लङ् लकारः | प्रथमपुरुषः | एकवचनम् |
| (क) प्रयतते | | | | |
| (ख) अयच्छत् | | | | |
| (ग) ऐच्छत् | | | | |
| (घ) तिष्ठति | | | | |

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| यथा -मातुर्नाम | मातुः + नाम = | विसर्गसन्धिः |
| (क) पराधीनता | | |
| (ख) गोपाचलः | | |
| (ग) देशोऽयम् | | |
| (घ) इत्यासीत् | | |

8. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत -**

(क) महाराजः

(ख) क्षेत्रपतिः

(ग) वीरपुरुषः

(घ) राष्ट्रभक्तिः

(ङ) यशःशरीरम्

9. **उदाहरणानुसारं पर्यायशब्दान् लिखत -**

**उदाहरणम् - केसरी (रिन्) - सिंहः**

(क) स्वतन्त्रः - ................................

(ख) कृपाणः - ................................

(ग) युद्धम् - ................................

(घ) तनयः - ................................

(ङ) जन्मभूमिः - ................................

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **स्वातन्त्र्यनायकाः** स्वकीयं सर्वस्वं हुतवन्तः।

(ख) छत्रसालः **शिववीरं** महाराजं मिलितवान्।

(ग) अयं **बाल्यकालात्** एव भारतमातरं विमोक्तुं प्रयतते स्म।

(घ) छत्रसालः **भूषणस्य** शिविकाम् उत्तोलयत्।

(ङ) **'मऊसहानिया' स्थले** सः प्राणान् अत्यजत्।

## योग्यताविस्तारः -

- महाराजछत्रसालसदृशाः येऽन्ये स्वातन्त्र्यनायकाः मध्यप्रदेशे अभवन् तेषां नामानि लिखत।

नवदशः पाठः

# गुरुदक्षिणा



'गुरुदक्षिणा' अयं शब्दः प्राचीनभारतीयाः अध्ययनाध्यापनपरम्परायाः पारिभाषिकशब्दः न तु पौरोहित्यपरकः शब्दः। विद्यासमाप्तेः अनन्तरं शिष्याः गुरवे गुरुदक्षिणां समर्पयन्ति स्म। गुरुदक्षिणां समर्प्य एव शिष्यः प्राप्तविद्यायाः सार्थक्यम् अनुभवति स्म। गुरुदक्षिणेयं विद्यायाः पूर्णतां द्योतयतीति। अत्र महाकविकालिदासस्य रघुवंशमहाकाव्यात् गुरुदक्षिणासम्बन्धिताः केचन श्लोकाः प्रदत्ताः। प्रदत्तेषु श्लोकेषु गुरुदक्षिणार्थिनः कौत्सस्य तथा दातुः महाराजरघोः उदात्तभावस्य निरूपणं विद्यते। याचकः आवश्यकतायाः अधिकम् एकम् अपि पणं स्वीकर्तुं सिद्धः नास्ति, परं दाता यत् धनं कुबेरात् प्राप्तं तत्सर्वमपि दातुमुत्सुकः। अपरिग्रहस्य उदात्तो भावः अत्र महाकविना प्रस्तुतः तस्यैव सौन्दर्यं पाठेऽस्मिन् प्रस्तुतम्।

*तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोष जातम्।*
*उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥1॥*

**अन्वयः** - विश्वजिति अध्वरे निःशेषविश्राणितकोषजातम् तं क्षितीशम् उपात्तविद्यः गुरुदक्षिणार्थी वरतन्तुशिष्यः कौत्सः प्रपेदे।

**शब्दार्थः** -
- विश्वजिति अध्वरे - विश्वजित् यज्ञ (की दक्षिणा) में
- निःशेषविश्राणितकोषजातम् - दान में दे दिए जाने के कारण जिसका खजाना रिक्त हो गया है
- तं क्षितीशम् - उस रघु के पास
- उपात्तविद्यः - विद्या पढ़कर
- गुरुदक्षिणार्थी - गुरुदक्षिणा के लिए (१४ करोड़ स्वर्ण मुद्राएँ लेने की इच्छा से)
- वरतन्तुशिष्यः कौत्सः - वरतन्तु के शिष्य कौत्स
- प्रपेदे - आए

*स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः।*
*श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥2॥*

**अन्वयः** - अनर्घशीलः यशसा प्रकाशः आतिथेयः सः वीतहिरण्मयत्वात् मृण्मये पात्रे अर्घ्यम् निधाय श्रुतप्रकाशम् अतिथिम् प्रत्युज्जगाम।

**शब्दार्थः** -
- अनर्घशीलः - निश्छल व्यवहार/असाधारण स्वभाव वाला
- यशसा प्रकाशः - यशस्वी
- आतिथेयः - अतिथिसेवी
- सः - वह (रघु)
- वीतहिरण्मयत्वात् - सुवर्ण पात्रों के अभाव में

| | | |
|---|---|---|
| मृण्मये पात्रे | - | मिट्टी के पात्र में |
| श्रुतप्रकाशम् | - | वेदाध्ययन से देदीप्यमान् (कौत्स के) |
| प्रत्युज्जगाम | - | पास आए |

**तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।**
**अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥3॥**

**अन्वय:** - अर्हत: तव अभिगमेन मे मन: न तृप्तम्, किन्तु नियोगक्रियया उत्सुकम् शासितु: आज्ञया अपि आत्मना वा माम् सम्भावयितुम् वनात् प्राप्तोऽसि ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| अर्हत: | - | पूज्य के (आपके) |
| अभिगमेन | - | आगमन मात्र से |
| तृप्तम् | - | सन्तुष्ट |
| नियोगक्रियया | - | दान की क्रिया से |
| उत्सुकम् | - | उत्सुक को (मुझ रघु को) |
| शासितु: | - | गुरु को |
| आत्मना | - | स्वेच्छा से |
| सम्भावयितुम् | - | कृतार्थ करने के लिए |

**इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।**
**स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्य: ॥4॥**

**अन्वय:** - अर्घ्यपात्रानुमितव्ययस्य रघो: इति उदारम् अपि गाम् निशम्य वरतन्तुशिष्य: स्वार्थोपपत्तिम् प्रति दुर्बलाश: सन् तम् इति अवोचत् ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| अर्घ्यपात्रानुमितव्ययस्य | - | अर्घ्यपात्र से (यज्ञ में हुए) व्यय को व्यक्त करने वाले |
| गाम् | - | वाणी को |
| स्वार्थोपपत्तिम् | - | अपनी कार्य सिद्धि में |
| दुर्बलाश: सन् | - | निराश होते हुए |
| तम् | - | उस रघु से / को |
| अवोचत् | - | कहा |

**समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।**
**स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥5॥**

**अन्वय:** - समाप्तविद्येन मया महर्षि: गुरुदक्षिणायै विज्ञापित: अभूत्, स च चिराय अस्खलितोपचारां ताम् भक्तिम् एव पुरस्तात् अगणयत् ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| समाप्तविद्येन मया | - | समस्त विद्याओं को पढ़ने के बाद मैंने |

| | | |
|---|---|---|
| गुरुदक्षिणायै | - | गुरुदक्षिणा के लिए |
| विज्ञापित: | - | प्रार्थना की |
| चिराय | - | बहुत दिनों तक |
| अस्खलितोपचाराम् | - | नियमपूर्वक की गई |
| तां भक्तिम् | - | उस गुरु सेवा को |
| पुरस्तात् | - | श्रेष्ठ दक्षिणा |
| अगणयत् | - | गिना/माना |

*निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्त: ।*

*वित्तस्य विद्यापरिसङ्ख्यया मे कोटीश्चतस्रो दश चाहरेति ॥6॥*

**अन्वय: -** निर्बन्धसञ्जातरुषा गुरुणा अर्थकार्श्यम् अचिन्तयित्वा अहम् 'वित्तस्य चतस्र: दश च कोटी: मे आहर' इति विद्यापरिसङ्ख्यया उक्त: ।

**शब्दार्थ: -**

| | | |
|---|---|---|
| निर्बन्धसञ्जातरुषा | - | बार-बार (गुरुदक्षिणा के लिए) आग्रह करने पर क्रोध से |
| अर्थकार्श्यम् | - | दरिद्रता/गरीबी को |
| अचिन्तयित्वा | - | विचार न करके |
| वित्तस्य | - | धन की/मुद्रा की |
| चतस्र: दश च कोटी: | - | चौदह करोड़ |
| आहर | - | दो |
| विद्यापरिसङ्ख्यया | - | चौदह विद्याओं की सङ्ख्या के मान से |

*गुर्वर्थमर्थी श्रुतपारदृश्वा रघो: सकाशादनवाप्य कामम् ।*

*गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतार: ॥7॥*

**अन्वय: -** 'श्रुतपारदृश्वा गुर्वर्थम् अर्थी रघो: सकाशात् कामम् अनवाप्य वदान्यान्तरम् गत:' इति अयम् मे परीवादनवावतार: मा भूत् ।

**शब्दार्थ: -**

| | | |
|---|---|---|
| श्रुतपारदृश्वा | - | शास्त्रों में पारङ्गत |
| गुर्वर्थम् | - | गुरु के लिए |
| अर्थी | - | गुरुदक्षिणायाचक |
| सकाशात् | - | पास से |
| कामम् | - | मनोरथ को |
| अनवाप्य | - | पूर्ण न होने पर |
| वदान्यान्तरम् | - | अधिक दान देने वाले दूसरे दानी के पास |
| परिवादनवावतार: | - | निन्दा का नया अवतार |

*तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्सङ्गरमग्रजन्मा ।*

*गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥8॥*

**अन्वयः** - अग्रजन्मा प्रतीतः सन् तस्य अवितथम् सङ्गरम् इति प्रत्यग्रहीत्, तथा रघुः अपि गाम् आत्तसाराम् अवेक्ष्य कुबेरात् अर्थम् निष्क्रष्टुम् चकमे ।

**शब्दार्थः** -

| | | |
|---|---|---|
| अग्रजन्मा | - | ब्राह्मण (कौत्स) |
| प्रतीतः सन् | - | प्रसन्न होते हुए |
| अवितथम् | - | सत्य |
| सङ्गरम् | - | प्रतिज्ञा को |
| प्रत्यगृहीत् | - | स्वीकार किया |
| गाम् | - | पृथिवी को |
| आत्तसाराम् | - | सारहीन |
| अवेक्ष्य | - | समझकर |
| कुबेरात् | - | कुबेर से |
| अर्थम् | - | धन को |
| निष्क्रष्टुम् | - | लेने की इच्छा |
| चकमे | - | किया |

*तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।*

*दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥9॥*

**अन्वयः** - भूपतिः अभियास्यमानात् कुबेरात् लब्धम् वज्रभिन्नम् सुमेरोः पादम् इव स्थितम् तम् भासुरहेमराशिम् समस्तम् एव कौत्साय दिदेश ।

**शब्दार्थः** -

| | | |
|---|---|---|
| भूपतिः | - | रघुः |
| अभियास्यमानात् | - | युद्ध के लिए चढ़ाई किए जाने वाले (से) |
| कुबेरात् | - | कुबेर से (धन के देवता) |
| वज्रभिन्नम् | - | वज्र से काट कर गिराये हुए |
| सुमेरोः | - | सुमेरु के |
| पादम् इव | - | टुकड़े के समान |
| भासुरहेमराशिम् | - | चमकती हुई सुवर्ण राशि (को) |
| दिदेश | - | दे दी |

*जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।*
*गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥10॥*

**अन्वयः** - तौ द्वौ अपि साकेतनिवासिनः जनस्य अभिनन्द्यसत्वौ अभूताम् । गुरुप्रदेयाधिकनिःस्पृहः अर्थी, अर्थिकामात् अधिकप्रदः नृपः च ।

**शब्दार्थः** -

| | | |
|---|---|---|
| तौ द्वौ | - | वे दोनों (दाता और याचक) |
| साकेतनिवासिनः जनस्य | - | अयोध्या निवासी लोगों का |
| अभिनन्द्यसत्वौ | - | अभिनन्दन के पात्र |
| अभूताम् | - | हो गए |
| गुरुप्रदेयाधिकनिःस्पृहः | - | गुरुदक्षिणा से अधिक न लेने का इच्छुक |
| अर्थी | - | याचक (कौत्स) |
| अर्थिकामात् | - | याचक की कामना से |
| अधिकप्रदः | - | अधिक देने वाला |
| नृपः | - | राजा (रघु) |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत -**

(क) वरतन्तुशिष्यः कः आसीत् ?
(ख) अनर्घशीलः कः ?
(ग) वरतन्तुशिष्यः स्वार्थोपपत्तिं प्रति कीदृशः सञ्जातः ?
(घ) गुरुणा किम् अचिन्तयित्वा उक्तः ?
(ङ) रघुः कस्मात् धनं प्राप्तुम् इष्टवान् ?

**2. एकवाक्येन उत्तरं लिखत -**

(क) रघुः कस्मात् हेमराशिम् लब्धवान् ?
(ख) वरतन्तुः कौत्सं कियत् धनं याचितवान् ?
(ग) विश्वजिति अध्वरे रघुः कीदृशः सञ्जातः ?
(घ) रघुः गां कीदृशीम् अमन्यत् ?
(ङ) तौ द्वौ कस्य अभिनन्द्यसत्वौ अभूताम् ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) रघोः समीपं कः किमर्थम् आगतः ?
(ख) कीदृशः रघुः कस्मिन् पात्रे अर्घ्यं निधाय अतिथिं प्रत्युज्जगाम ?
(ग) वारं-वारं प्रार्थयन्तं कौत्सं गुरुः किमुक्तवान् ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(मनः, द्वावपि, मा, अर्थम्, मृण्मये)

(क) रघुः ........................... पात्रे अर्घ्यं दत्तवान्।

(ख) तव अभिगमेन मे .................... न तृप्तम्।

(ग) ........................ अभूताम् अभिनन्दसत्वौ।

(घ) मे परिवादनवावतारः ...................... भूत्।

(ङ) रघुः कुबेरात् ...................... निष्क्रष्टुम् चकमे।

5. **यथायोग्यं योजयत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | कौत्सः | दानी |
| (ख) | वरतन्तुः | पृथिवीम् |
| (ग) | रघुः | धनदेवः |
| (घ) | कुबेरः | गुरुदक्षिणार्थी |
| (ङ) | गाम् | गुरुः |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) कुबेरः रघुं धनं दत्तवान्। ☐

(ख) रघुः हिरण्मयपात्रे कौत्साय अर्घ्यं दत्तवान्। ☐

(ग) कौत्सः धनं स्वीकर्तुं गुरुसमीपं गतवान्। ☐

(घ) कौत्सः गुरुदक्षिणार्थी आसीत्। ☐

(ङ) रघुः वरतन्तुशिष्यः आसीत्। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – गुरुणा | गुरु | तृतीया | एकवचनम् |
| (क) यशसा | | | |
| (ख) अध्वरे | | | |
| (ग) जनस्य | | | |
| (घ) गुरुदक्षिणायै | | | |
| (ङ) रघोः | | | |
| (च) कौत्साय | | | |
| (छ) कुबेरात् | | | |
| (ज) क्षितीशम् | | | |

**8. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| यथा -इत्यर्धम् | इति + अर्धम् | यण्सन्धिः |
| (क) तवार्हतः | | |
| (ख) अप्याज्ञया | | |
| (ग) गुर्वर्थम् | | |
| (घ) सुमेरोरिव | | |

**9. अधोलिखितशब्दानां पर्यायशब्दान् लिखत -**

| | |
|---|---|
| यथा - वित्तम् | धनम् |
| (क) अध्वरः | |
| (ख) क्षितीशः | |
| (ग) गुरुः | |
| (घ) याचकः | |

**10. अव्ययैः वाक्यनिर्माणं कुरुत -**

| | |
|---|---|
| यथा -अपि | अहम् अपि पठामि। |
| (क) इति | |
| (ख) न | |
| (ग) प्रति | |
| (घ) इव | |

**11. प्रदत्तश्लोकान्वयस्य पूर्तिं कुरुत -**

निर्बन्धसञ्जातरुषा .................... अर्थकार्श्यम् ...................... अहं वित्तस्य

चतस्रः दश च कोटीः मे ................ इति .................... उक्तः।

**योग्यताविस्तारः -**

- पाठे आगतानां श्लोकानां सस्वरगायनं कुरुत।
- रघोः अन्यान् आदर्शगुणान् अन्विष्य लिखत।

विंशः पाठः

# विदिशा

संस्कृतसाहित्ये पत्रलेखनपरम्परा पूर्वकालादद्यप्रभृति सशक्ता संवर्द्धमाना च विद्यते। पत्रमाध्यमेनैव स्वीयान् मनोगतान् हार्दभावान् प्रकटयति पत्रप्रेषकः । मुख्यान् विषयानत्र सङ्क्षेपीकृत्यैव प्रस्तूयते । विषयानुरूपमेव उपक्रमोपसंहारौ विलिख्येते । प्रस्तुतेऽस्मिन् पत्रे विदिशायाः सांस्कृतिकमैतिहासिकञ्च वैशिष्ट्यं वर्णितमस्ति।

शासकीय-उच्चतरमाध्यमिकविद्यालयः

सिंगरौलीनगरम् (मध्यप्रदेशः)

31-01-2008

पूज्यपादाः पितृचरणाः !

सश्रद्धमभिवादये !!

अत्र कुशलं तत्राऽस्तु । पितृवर्य ! विदितं स्यादिदं यत् मम स्वाध्यायः सम्प्रति सुष्ठुतया प्रचलति । विगते सप्ताहेऽस्माकं विद्यालयस्य शैक्षणिकं भ्रमणदलं विदिशानगरीं गतवानासीदिति । तेन दलेन सह अहमपि तत्रागच्छम्।

मध्यप्रदेशस्थनगरीयं पौराणिकी ऐतिहासिकी च वर्तते । विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सुविख्याता आसीत् । एतस्य कारणं सूर्यदेवतायाः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव । पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत् । योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट् अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम् ।

पौराणिकी कथानुरूपं हैहयवंशीयाः राजानो अत्र राज्यं प्रकुर्वन्ति स्म । आदिकविना वाल्मीकिना प्रणीतेन रामायणेन विज्ञायते यत् त्रेतायुगे शत्रुघ्नेन स्वकीयं पुत्रं 'सुबाहु' नामानम् अत्रत्यः शासकरूपेणाभिषिच्य प्रदेशममुं स्वायत्तीकृतमासीत् । कविकुलगुरुः कालिदासः गीतिकाव्ये मेघदूते पूर्वमेघे नगरीमिमां दशार्णदेशस्य राजधानीत्वेन अवर्णयत् ।

सर्वप्रथमं वयं सर्वे पुरातत्त्वसङ्ग्रहालयं द्रष्टुमगच्छाम । तत्र कलात्मिकानां पाषाणप्रतिमानाम् अद्वितीयः सङ्ग्रहो विद्यते । 'बेसनगरम' इत्याख्यस्य स्थलस्योत्खनने समुपलब्धाऽपि सामग्री वर्ततेऽत्रैव । अत्र यक्षस्य, ग्यारसपुरस्य शालभञ्जिकायाः सदाशिवस्य (त्रिमुखिनः शिवस्य) चाप्रतिमाः प्रतिमाः सङ्ग्रहीताः सन्ति । नगर्याः मध्ये 'लोहाङ्गी' स्मारको विद्यते । अत्र संरक्षितः शुङ्गकालीनः शीर्षस्तम्भस्यावशेषः कलात्मकदृष्ट्या अपूर्वः ।

अस्याः उत्तरपश्चिमदिशि दुर्गाभ्यन्तरे स्थितमस्ति 'बीजामण्डलम्' । चर्चिकादेव्याः मन्दिरमिदं विजयदेव्याः अपराभिधेयेन विजयमन्दिरमिति नाम्ना लोके प्रसिद्धिमगात् ।

वेत्रवत्याः वामतटे क्रोशमेकं दूरं वर्तते 'हेलिओडोरस-स्तम्भ' इति । इयं तु शुङ्गनृपतेः काशीपुत्रभागभद्रस्य शासनकाले

विनिर्मिता वास्तुकृतिरस्ति । स्तम्भोपरि समुत्कीर्णेन लेखेन ज्ञायते यत् तक्षशिला वास्तव्यस्य दियस्य पुत्रो हेलिओडोरस नामा यवनाधिपतेः अन्तलिकितस्य राजदूतत्वेन वैदेशिको भवन्नपि श्रीवैष्णवधर्मस्य दीक्षां ग्रहीतवान् । अत्रत्यो गरुडशीर्षस्तम्भो हिन्दुधर्मं प्रति तस्योदारभावनां संसूचयति ।

वेत्रवत्याः समीपे विंशतिसङ्ख्यकाः गुहाः सन्ति; याः सर्वाः ''उदयगिरिगुहा'' नाम्ना प्रख्याताः वर्तन्ते । इमाः सर्वाः स्वर्णयुगस्य गुप्तकालस्य माहात्म्यगाथां प्रगायन्ति ।

विदिशातः किञ्चिद् दूरस्थे चितौरियानामके ग्रामे नवम्याः दशम्याश्च शताब्द्याः परमारकालीनाः ब्रह्मणः, विष्णोः, शिवस्य, गणेशस्यार्द्धनारीश्वरस्य प्रतिमाः दर्शनीयाः सन्ति।

कालक्रमेणात्र जैन-बौद्धसम्प्रदाययोः विकासोऽपि समभवत्। विशेषरूपेण, गुप्तकाले चतुर्थ्यां शताब्द्यां रामगुप्ताधिशासिते जैनतीर्थङ्कराणां मूर्तिनिर्माणं, तथा च तासां प्रतिष्ठापनं गोलक्यान्त्यायाः सुपुत्रस्य चेलुक्षमणस्य, तच्छिष्यस्याचार्यसर्प्यसेनस्य च प्रेरणया कारितम् आसीत्। निकटमेव साञ्चीनगरे बौद्धसम्प्रदायस्य स्तूपो वर्तते।

अन्ते च, सर्वेभ्यः ज्येष्ठेभ्यः सादरं प्रणामाः। अनुजेभ्यः हार्दिकः स्नेहः। मित्रेभ्यः शुभाकाङ्क्षां प्रकटीकरोमि।

भवदीयः पुत्रः

मृदुलः

## शब्दार्थः

पूज्यपादाः - पूजनीय चरणों वाले। सश्रद्धम् - श्रद्धासहित। विदितम् - ज्ञात (जाना हुआ)। सम्प्रति - इस समय। सुष्ठुतया - ठीक प्रकार से। विगते - पिछले। सह - साथ। पुरा - पहले, प्राचीन समय में। लोकख्यातिः - लोगों में प्रसिद्ध। समुन्नतं - उन्नति को प्राप्त। प्रणीतेन - रचे गये के द्वारा। विज्ञायते - जाना जाता है। अत्र - यहाँ। अभिषिच्य - (राज्य) अभिषेक करके। अमुम् - इसको। स्वायत्तीकृतम् - अपने अधीन कर लिया। सम्प्राप्य - पहुँचकर। द्रष्टुम् - देखने के लिये। त्रिमुखिनः - तीन मुख वाले का। अप्रतिमाः - अद्वितीय (बहुवचन)। स्मारकः - स्मरण कराने वाला। अवशेषः - शेष (बाकी) बचा हुआ। अपूर्वः - अनोखा। दिशि - दिशा में। दुर्गाभ्यन्तरे - किले के बीच में। अपराभिधेयेन - दूसरे नाम से। प्रसिद्धिम् - ख्याति को। अगात् - (प्राप्त हो) गया। क्रोशम् - एक कोस। वैदेशिकः - विदेशी। ज्ञायते - जाना जाता है। गुहाः - गुफायें। प्रख्याताः - प्रसिद्ध (बहुवचन)। दर्शनीयाः - देखने योग्य। शताब्द्याः - शताब्दी (शती) की। कालक्रमेण - काल के क्रम से। प्रतिष्ठापनम् - प्रतिष्ठित करना। कारितम् - करवाया। स्तूपः - बौद्धभिक्षु का निवास स्थान। सर्वेभ्यः - सभी के लिये। अनुजेभ्यः:- छोटे भाइयों के लिये। हार्दिकः - हृदय से उत्पन्न। शुभाकाङ्क्षा - शुभकामना। प्रकटीकरोमि - प्रकट करता हूँ।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) विद्यालयस्य शैक्षणिकं भ्रमणदलं कुत्र गतवान् ?

(ख) पूर्वस्मिन् काले विदिशानगर्याः किं नाम आसीत् ?

(ग) 'सुबाहुः' कस्य पुत्रः आसीत् ?

(घ) विदिशानगरी कस्याः नद्यास्तटे वर्तते ?

(ङ) कस्य नृपस्य शासनकाले 'हेलिओडोरस-स्तम्भः' निर्मितः आसीत् ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते ?

(ख) विदिशानगरी कस्य देशस्य राजधानी आसीत् ?

(ग) विदिशामध्ये किं नाम स्मारको वर्तते ?

(घ) दुर्गाभ्यन्तरे किं स्थितम् अस्ति ?

(ङ) श्रीवैष्णवधर्मस्य दीक्षां कः ग्रहीतवान् ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) 'भेलसा' नाम्नेयं नगरी कथं प्रसिद्धा ?

(ख) गुप्तकालस्य माहात्म्यगाथां काः प्रगायन्ति ?

(ग) विदिशानगर्याः काः प्रतिमाः दर्शनीयाः सन्ति ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(उदारभावनाम्, पुरातनकालादेव, कुशलं, ग्रहीतवान्, द्रष्टुम्)

(क) अत्र ...................... तत्राप्यस्तु।

(ख) वयं सर्वे पुरातत्त्वसङ्ग्रहालयं .................. अगच्छाम।

(ग) श्रीवैष्णवधर्मस्य दीक्षां ..........................।

(घ) हिन्दुधर्मं प्रति तस्य ........................ संसूचयति।

(ङ) नगर्याः स्थितिः ....................... विद्यते।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) भेलसा | उदयगिरिगुहाः |
| (ख) आदिकविना | शालभञ्जिका |
| (ग) विंशतिसङ्ख्यकाःगुहाः | भेल्लस्वामिन् |
| (घ) ग्यारसपुरस्य | गुप्तकालस्य |
| (ङ) स्वर्णयुगस्य | वाल्मीकिना |